# शुक्लयजुर्वेदे पारिभाषिकशब्दाः

**त्रिभुवन-विश्वविद्यालयान्तर्गतस्य संस्कृत-केन्द्रीय-विभागस्य**

**स्नातकोत्तर(एम.ए.)तहगततृतीयसामिसत्रस्य**

**द्वादशपत्रस्य पाठ्यांशपूर्तये**

**प्रस्तुतः**

# शोधप्रबन्धः


शोधार्थी

**मनोजः घिमिरे**

*संस्कृत-केन्द्रीय-विभागः*

२०७५

# शोधनिर्देशक-सम्मतिः

त्रिभुवन-विश्वविद्यालयस्य संस्कृत-केन्द्रीय-विभागान्तर्गतस्य स्नातकोत्तरतहगततृतीयसामिसत्रस्य द्वादशपत्रस्य पाठ्यांशपूर्तये 'मनोज-घिमिरे' इत्यनेन शोधच्छात्रेण '**शुक्लयजुर्वेदे पारिभाषिकशब्दाः**' इत्यस्मिन् शीर्षके प्रस्तुतोऽयं मन्निर्देशने निर्मितो विद्यते।

अनेन छात्रेण शोधप्रबन्धेऽस्मिन् शुक्लयजुर्वेदस्य प्रथमद्वितीयतृतीयाध्यायगतानां पारिभाषिकशब्दानां परिशीलनं सपरिश्रमं विहितम्। शोधप्रबन्धस्यास्य समुचितमूल्याङ्कनाय सम्बद्धनिकायेऽग्रेसारयामि।

दिनाङ्काः - २०७५/०९/०९

......................................

**(डा. माधवप्रसाद उपाध्यायः)**

सहप्राध्यापकः

संस्कृत-केन्द्रीय-विभागः, त्रिभुवन विश्वविद्यालयः

# ***संक्षिप्तशब्दसूची, सङ्केतचिह्नानि च***

| *संक्षिप्तरूपम्* | *पूर्णरूपम्* |
|---|---|
| एम.ए. | Master of arts (स्नातकोत्तरम्) |
| क्र.सं. | क्रमसंख्या |
| डा. | Doctor (विद्यावारिधिकः) |
| पृ. | पृष्ठसंख्या |
| प्रा. | प्राध्यापकः |
| वि.सं. | विक्रमसंवत् |
| व्याख्या. | व्याख्याकारः |
| शु.वेदः | शुक्लयजुर्वेदः |
| सम्पा. | सम्पादकः |
| सहप्रा. | सहप्राध्यापकः |
| / | वा / अथवा |
| ……. | कश्चिदंशस्त्यक्तः |
| = | अर्थस्पष्टीकरणम् |
| – | संयोजकः |

*॥ इति ॥*

# विषयसूची

## *प्रथमोऽध्यायः*

### शोधप्रबन्धपरिचयात्मकः


१.१ शोधशीर्षकम् — १

१.२ शोधप्रयोजनम् — १

१.३ विषयपरिचयः — १

१.४ समस्याकथनम् — २

१.५ शोधपत्रस्योद्देश्यम् — २

१.६ पूर्वकार्यस्य समीक्षणम् — ३

१.७ शोधपत्रस्यौचित्यम् — ४

१.८ अध्ययनस्य सीमाङ्कनम् — ४

१.९ शोधविधिः — ५

१.९.१ सामग्रीसङ्कलनविधिः — ५

१.९.२ अध्ययनविश्लेषणविधिः — ५

१.१२ शोधपत्रस्य स्वरूपम् — ५


## *द्वितीयोऽध्यायः*

### वैदिकवाङ्मयस्य संक्षिप्तपरिचयात्मकः


२.१ वेदस्वरूपम् — ७

२.२ वेदमहत्त्वम् — ८

२.३ ऋग्वेदपरिचयः — ११

२.४ यजुर्वेदपरिचयः — १२

२.५ सामवेदपरिचयः — १३

२.६ अथर्ववेदपरिचयः — १४

२.७ ब्राह्मणम् — १४

२.८ ब्राह्मणवैशिष्ट्यं, महत्त्वञ्च — १६

२.९ ब्राह्मणग्रन्थाः — १७

२.१० आरण्यकपरिचयः १८

२.११ उपनिषद् १९

२.१२ अङ्गस्योपकारकत्वम् २०

२.१२.१. शिक्षा २०

२.१२.२ व्याकरणम् २१

२.१२.३ छन्दः २२

२.१२.४ निरुक्तम् २३

२.१२.५ ज्योतिषम् २४

२.१२.६ कल्पः २५

(अ) श्रौतसूत्रम् २५

(आ) गृह्यसूत्रम् २५

(इ) धर्मसूत्रम् २५

(ई) शुल्वसूत्रम् २६

२.१३ शुक्लयजुर्वेदीया माध्यन्दिनसंहिता २८

२.१३.१ मन्त्राः २८

२.१३.२ भाष्यकाराः २९

(अ) उव्वटः ३०

(आ) महीधरः ३०

(इ) दयानन्दः ३१

२.१४ पारिभाषिकशब्दाः ३२

## *तृतीयोऽध्यायः*

### दर्शपौर्णमासेष्टिगतानां पारिभाषिकशब्दानां परिशीलनात्मकः

३.१ इट् ३३

३.२ श्रेष्ठतमं कर्म ३४

३.३ अघ्न्या ३५

३.४ गोपतिः ३६

| | |
|---|---|
| ३.५ वसुः | ३६ |
| ३.६ पवित्रम् | ३७ |
| ३.७ घर्मः | ३८ |
| ३.८ सोमः | ४० |
| ३.९ अग्निः | ४१ |
| ३.१० व्रतपतिः | ४३ |
| ३.११ रक्षः | ४४ |
| ३.१२ अरातिः | ४५ |
| ३.१३ धूः | ४६ |
| ३.१४ स्वः | ४७ |
| ३.१५ अदितिः | ४८ |
| ३.१६ अग्रेगुवः / अग्रेपुवः | ४९ |
| ३.१७ शर्म | ४९ |
| ३.१८ पृथुबुध्नः | ५० |
| ३.१९ हविः | ५१ |
| ३.२० कुक्कुटः | ५२ |
| ३.२१ वर्षवृद्धम् | ५३ |
| ३.२२ हिरण्यपाणिः | ५४ |
| ३.२३ धृष्टिः | ५५ |
| ३.२४ भ्रातृव्यः | ५६ |
| ३.२५ मही | ५७ |
| ३.२६ अतमेरुः | ५७ |
| ३.२७ क्रूरः | ५८ |
| ३.२८ विरप्शी | ५९ |
| ३.२९ स्वधा | ६० |
| ३.३० प्रोक्षणी | ६० |
| ३.३१ यजुः | ६१ |

३.३२ कृष्णः ६२
३.३३ आखरेष्ठः ६३
३.३४ स्तुपः ६४
३.३५ परिधिः ६५
३.३६ जुहूः ६६
३.३७ प्रियधाम ६७
३.३८ ध्रुवा ६७
३.३९ उपभृत् ६८
३.४० मित्रावरुणौ ६९
३.४१ वयः ठण
३.४२ वशापृश्निः ७१
३.४३ अनुभरामि ७२
३.४४ पाथः ७२
३.४५ वाट् ७३
३.४६ धुर्यौ ७४
३.४७ दिद्युः ७४
३.४८ संवेशपतिः ७५
३.४९ योनिः ७६
३.५० वेदः ७७
३.५१ गातुवित् ७८
३.५२ नभः ७८

## *चतुर्थोऽध्यायः*

### पिण्डपितृयज्ञाग्न्याधानचातुर्मास्यादिगतानां पारिभाषिकशब्दानां परिशीलनात्मकः

४.१ कव्यवाहनः ८०
४.२ परापुरः/निपुरः ८१
४.३ आवृषायध्वम् ८१

| | |
|---|---|
| ४.४ पुष्करस्रक् | ८२ |
| ४.५ कीलालम् | ८२ |
| ४.६ अंगिरः | ८३ |
| ४.७ गौः | ८४ |
| ४.८ पृश्निः | ८४ |
| ४.९ महिषः | ८५ |
| ४.१० धाम | ८६ |
| ४.११ पतंगः | ८६ |
| ४.१२ सजूः | ८७ |
| ४.१३ वेतु | ८७ |
| ४.१४ ककुत् | ८८ |
| ४.१५ जिन्वति | ८८ |
| ४.१६ आहुवध्यै | ८९ |
| ४.१७ मादयध्यै | ८९ |
| ४.१८ हुवे | ८९ |
| ४.१९ अप्नवानः | ९० |
| ४.२० विशे | ९० |
| ४.२१ शुक्रम् | ९१ |
| ४.२२ अहूयः | ९२ |
| ४.२३ ऋषिः | ९२ |
| ४.२४ वयस्वन्तः | ९३ |
| ४.२५ चित्रावसुः | ९४ |
| ४.२६ अन्धः | ९४ |
| ४.२७ रेवतीः | ९५ |
| ४.२८ क्षयः | ९६ |
| ४.२९ दोषावस्तः | ९७ |
| ४.३० दमः | ९७ |

४.३१ सूपायनः ९८
४.३२ वरुथ्यः ९८
४.३३ अथर्यः ९९
४.३४ पुरीष्यः १००
४.३५ कीलालः १००
४.३६ करम्भः १०१
४.३७ अवयजामहे १०२
४.३८ अस्तम् १०२
४.३९ अवभृथः १०३
४.४० निचुम्पुणः १०४
४.४१ पुरुरावा १०५
४.४२ नाराशंसः १०५
४.४३ अवसम् १०६
४.४४ त्र्यायुषम् १०७

## *पञ्चमोऽध्यायः*

**उपसंहारात्मकः**

उपसंहार १०८–११०

## *परिशिष्टभागः*

सन्दर्भग्रन्थसूची १–३

*।। इति ।।*

त्रिभुवन–विश्वविद्यालयः
## संस्कृत-केन्द्रीय-विभागः
कीर्तिपुरम्, काष्ठमण्डपः

# स्वीकृति-पत्रम्

त्रिभुवन–विश्वविद्यालयान्तर्गतस्य संस्कृत–केन्द्रीय–विभागस्य स्नातकोत्तरतहगत–तृतीयसामिसत्रस्य द्वादशपत्रस्य पाठ्यांशपरिपूर्तये मनोज–घिमिरेनाम्ना छात्रेण

**शुक्लयजुर्वेदे पारिभाषिकशब्दाः**

इति शीर्षकान्वितः शोधप्रबन्धः प्रस्तुतो विद्यते।
स्नातकोत्तरोपाधये प्रस्तुतमिमं शोधप्रबन्धं समुचितमिति मत्वा
स्वीकृतिः प्रदत्ताऽस्ति।

## शोध-मूल्याङ्कन-समितिः

| *दायित्वम्* | *नामक्रमः* | *हस्ताक्षराणि* |
|---|---|---|
| शोधनिर्देशकः– | सहप्रा.डा. माधवप्रसाद उपाध्यायः | ...................... |
| बाह्यपरीक्षकः– | प्रा.डा. आनन्दप्रसादः घिमिरे | ...................... |
| विभागाध्यक्षः– | प्रा.डा. नारायणप्रसाद–गौतमः | ...................... |

*दिनाङ्कः* – ......................

# कृतज्ञता

शुक्लयजुर्वेदे पारिभाषिकशब्दाः इति शीर्षकयुतोऽयं शोधप्रबन्धस्त्रिभुवन–विश्वविद्यालयान्तर्गतस्य संस्कृत–केन्द्रीय–विभागस्य स्नातकोत्तर(एम.ए.)–तहगततृतीयसामिसत्रस्य द्वादशपत्रस्य पाठ्यांशपूर्तये विनिर्मितोऽस्ति ।

विश्ववाङ्मयेषु वेदाः सर्वतः प्रथमं परिगण्यन्ते, त एव प्राच्यसंस्कृतेः संस्कृतवाङ्मयस्य च प्राणभूताः सन्तीत्यत्र नास्ति कस्यचिद् वैमत्यम् । रक्षितेषु प्राणेषु यथा करचरणादिकं सर्वमङ्गजातं सुरक्षितं तिष्ठति, तथैव रक्षितेषु प्राणस्वरूपेषु वेदनिचयेषु तदङ्गभूतं कल्पव्याकरणादिकं सर्वं संस्कृतवाङ्मयं सुरक्षितं भवतीत्यत्रापि नास्ति सन्देहः ।

अत एव मया तस्यैव वेदस्य पारिभाषिकशब्दानामध्ययनेन वेदनारायणस्य शब्दसपर्या यथामति विहिता । स्नातकोत्तरस्तरीयां परीक्षां समुत्तीर्णाय एषः शोधप्रबन्धो निर्मितः, न तु बहुज्ञताप्रदर्शनाय । शास्त्रज्ञानाभावात् अस्मिन् शोधप्रबन्धे स्युः बहूनि च्युतिस्थलानि । तत्र सविनयं क्षमां याचे । अस्मिन् कर्मणि विविधैः महानुभावैः बहुविधं साहाय्यं कृतम् । ते औदार्यगुणशालिनो महानुभावा सादरं सश्रद्धञ्चात्र संस्मर्यन्ते ।

ते मनीषिणः श्रद्धावन्तो विद्यन्ते, येषां ग्रन्थाः, निबन्धाः, शोधप्रबन्धाः, कृतयश्च शोधप्रबन्धेऽस्मिन् प्रयुक्ता अधीताश्च सन्ति ।

त्रिभुवनविश्वविद्यालयीयसंस्कृतकेन्द्रीयविभागस्य विभागाध्यक्षाः प्रा.डा.नारायणप्रसाद–गौतममहाभागास्तथा ममास्य शोधकार्यस्य निर्देशकपदं बिभ्राणा सहप्रा.डा.माधवप्रसाद–उपाध्यायमहोदयाः सर्वदैव स्मरणीया विद्यन्ते । शोधकार्यस्यास्य सम्पूर्णतायै सदैव चिन्तनरताः, वारं वारं युक्तीः समुदिशन्तो मम प्रेरयितारस्तत्र भवन्तः शिक्षकत्वेन न, अभिभावकत्वेन सद्गुरुत्वेन च समादृता विद्यन्ते । तेषां गुरुचरणानां पादपद्मेषु नतेन मूर्ध्ना प्रणमाञ्जलिमर्पयामि ।

मेलनावस्थायामेव न, दूरभाषया च शोधकार्यं समाप्तम् ?, कदा समाप्स्यत ? इत्युदीरयन् मदीयां सुप्तचिकीर्षां समुद्बोधयन्तौ संस्कृतकेन्द्रीयविभागे प्राध्यापनरतौ सुबोधशुक्ल–रोहिणीराजतिमिल्सिनामहाभागौ तथा च वैदिकवाङ्मयविलोडनैकचित्ताः स्वाध्यायार्पितजीवनाः डा.रुद्रप्रसादमिश्रवर्याः कृतज्ञतावचोभिः संस्मर्यन्ते ।

शोधसन्दर्भेऽस्मिन् संस्कृतशिक्षाया उन्नयने स्वकीयममूल्यं जीवनं समर्प्य अल्पायुष्येव दिवङ्गतान् जनार्दन–घिमिरेगुरुवर्यान् विस्मर्तुं नैव शक्नोमि । संस्कृतविकासाय कृतभूरियोगदानेभ्यस्तत्र भवद्भ्यः श्रद्धापुष्पं समर्पयामि ।

एवञ्च पूज्यपितरौ सभक्तिं प्रणम्य अत्रावसरे भावनात्मकसाहाय्येन शोधकार्ये मत्साफल्यं विचारयन्तौ तोयनाथघिमिरे–केदारपौडेलाख्यौ सखायौ, सुशान्त–आचार्याभिधेयं भ्रातरञ्च प्रति हार्दिकीं कृतज्ञतां प्रयच्छामि । न केवलं भावनापक्षे, अपि तु रचनापक्षे च मदीयं गार्हस्थ्यं जीवनं सरलीकृत्य कार्येऽस्मिन् सहयोगप्रदायिनीं सञ्जु–पौडेलाख्यां मदीयां सहधर्मिणीं प्रति स्वान्तःप्रदेशाद्धन्यवादमभिव्यनज्मि ।

अन्ते चान्येभ्यो ज्ञाताज्ञातेभ्यः सहयोगिजनेभ्यः सश्रद्धं निश्छलां कृतज्ञतां समर्प्य वाग्देवीवन्दनपुरःसरमत्रैव विरमामि ।

.............................

(मनोजः घिमिरे)

ॐ

॥ श्रीगणेशाय नमः ॥

# प्रथमोऽध्यायः

## शोधप्रबन्धपरिचयात्मकः

### १.१. शोधशीर्षकम्

प्रस्तुतस्य शोधप्रबन्धस्य शीर्षकं शुक्लयजुर्वेदे पारिभाषिकशब्दाः इति वर्तते।

### १.२. शोधप्रयोजनम्

त्रिभुवन-विश्वविद्यालयान्तर्गतस्य संस्कृत-केन्द्रीय-विभागस्य स्नातकोत्तर(एम.ए.)-तहगततृतीयसामिसत्रस्य द्वादशपत्रगतपाठ्यांशपरिपूर्तये शोधप्रबन्धोऽयं प्रस्तुतो विद्यते।

### १.३. विषयपरिचयः

सर्वशास्त्राणां मूलभूतो मन्त्रब्राह्मणात्मको वेदोऽपौरुषेयोऽनादिश्च मन्यते । असौ शब्दराश्यात्मकस्त्रयीमयो वेदो विश्वस्य महानिधिः । अस्यैव मन्त्रब्राह्मणात्मकस्य वेदस्य धर्मब्रह्मणी चेति विषयद्वयं मुख्यत्वं भजते । धर्मशब्देन मुख्यतया यागादिर्गृह्यते । यागेषु च श्रौतयागानां प्रतिपादनं वेदेषु प्रामुख्येन दृश्यते। श्रौतयागेषु मुख्यतया कर्मचतुष्टयस्य प्राधान्याद् वेदविभागोऽपि चतुर्धा वर्तते। कर्मचतुष्टयं च हौत्रम्, आध्वर्यवम्, औद्गात्रम्, ब्रह्मत्वम् इति। तत्र हौत्रं कर्म ऋग्वेदसम्बद्धं वर्तते चेद् आध्वर्यवं यजुर्वेदसम्बद्धम् । औद्गात्रं सामवेदसम्बद्धञ्चेद् ब्रह्मत्वम् अथर्ववेदसम्बद्धमिति । संरचनात्मकभेदेन ऋग्यजुःसामात्मकं भेदत्रयञ्च प्रसिद्धम् ।

याज्ञिकसम्प्रदायेषु प्रसिद्धाः कतिपयशब्दाः विशिष्टमर्थं व्यक्तीकुर्वन्ति । पारिभाषिकरूपेण सम्बद्धास्ते शब्दाः योगजमर्थं विहाय रुढ्यर्थं प्रकटयन्ति । स्वतन्त्ररूपेण तेषां शब्दानां शोधमूलकमध्ययनमध्यापनं नैव जातं दृश्यते । तादृशमहत्त्वाधायकशब्दसंकलनपूर्वकं विश्लेषणं पारिभाषिकार्थप्रदर्शनञ्च कर्तुमुपर्युक्तं शीर्षकं मया स्वीकृतम् । अत्र शुक्लयजुर्वेदीयमाध्यन्दिनसंहितायाः प्रथमाध्यायादारभ्य तृतीयाध्यायपर्यन्तं संहितागताः कतिपयाः पारिभाषिकशब्दाः परिशील्यन्ते । तेषाञ्च मन्त्राणां परिशीलनमुव्वटमहीधरदयानन्दभाष्याणामाधारे विधास्यते । पारिभाषिकशब्दानां प्रकरणानुकूलार्थज्ञानाभावे वेदग्रन्थग्रन्थिर्नैवोद्घाट्यते । अध्ययनाध्यापनकर्मणि सौकर्यसम्पादनाय पारिभाषिकशब्दानां शोधमूलकं परिशीलनमावश्यकं भवति । अत एव उपर्युक्तं शीर्षकं समयसापेक्षमध्ययनानुरूपञ्चेति ।

### १.४. समस्याकथनम्

प्रस्तुतेऽस्मिन् शोधप्रबन्धे शुक्लयजुर्वेदे पारिभाषिकशब्दाः इत्यस्मिन् विषये सन्ति नैकाः समस्याः । तासु काश्चन मुख्यत्वेन दृश्यन्ते । ताश्चाधोनिर्दिष्टानुसारेण वर्तन्ते :

(क) कीदृशाः शुक्लयजुर्वेदीयाः पारिभाषिकशब्दाः? किञ्च तेषां महत्त्वम् ?

(ख) कश्च पारिभाषिकशब्दानामर्थनिर्धारणविधिः ?

(ग) का च परिभाषा, कुत्र च तेषां प्रयोगः?

### १.५. शोधपत्रस्योद्धेश्यम्

प्रस्तुतस्य शोधप्रबन्धस्य मुख्यमुद्देश्यं शुक्लयजुर्वेदे पारिभाषिकशब्दाः इत्याख्ये शोधशीर्षके केन्द्रीभूय समस्याकथने समुपस्थापितानां समस्यानां समाधानमेव वर्तते । फलतः शोधप्रबन्धस्यास्य उद्देश्यानि अधोनिर्दिष्टानुसारेण विद्यन्ते :

(क) शुक्लयजुर्वेदीयपारिभाषिकशब्दानां स्वरूपनिर्धारणपूर्वकं महत्त्वप्रतिपादनम्।

(ख) पारिभाषिकशब्दानामर्थनिर्धारणविधेर्निरूपणम्।

(ग) पारिभाषिकशब्दानां परिभाषाप्रदर्शनपुरस्सरं प्रयोगस्थलनिरूपणम्।

## १.६. पूर्वकार्यस्य समीक्षणम्

पौरस्त्यवाङ्मये वेदानामस्ति महद्गौरवं स्थानम् । भारतवर्षे बहुभिः मनीषिभिः वेदानधिकृत्य बहवो विषयाः परिशीलिताः । शास्त्रीय–सामाजिक–आर्थिक–वैज्ञानिकदृष्ट्या वेदमन्त्राणामैहिकामुष्मिकं लोकोपकारकत्वं निश्चित्य तेषां वैज्ञानिकानुसन्धानार्थं न केवलं प्राच्या अपि तु पाश्चात्या अपि विद्वांसः संलग्नाः सन्ति । अतो वैदिकशब्दानामर्थनिश्चयाय बहुभिर्विद्वद्भिर्महानायासो विहितः। तैर्विहितानां कार्याणां कालक्रमेणात्र समीक्षणक्रमे परिशीलनं विधास्यते। वस्तुतो विषयेऽस्मिन् स्वतन्त्ररूपेण गवेषणाप्रधानं निर्वचनात्मकं परिशीलनं नैव जातं दृश्यते । कतिपये विद्वांसः शास्त्रसम्पादनव्याख्यानक्रमे विशेषशब्दानां परिचयात्मकं निर्वचनमकार्षुः। तेषां निवेशश्च तत्तद्ग्रन्थानां परिशिष्टभागे प्राप्यते।

युधिष्ठिरमीमांसकमहोदयेन सम्पादनं विधाय प्रकाशितं श्रौतपदार्थनिर्वचनं (वि.सं.२०४१) श्रौतपदार्थानां परिचयप्रदानाय समर्थमस्ति। असौ ग्रन्थोऽज्ञातकर्तृक इति तत्रैवोल्लिखितम्। तत्र यागीयपदार्थानां विषयविवेचनपुरःसरं निर्वचनं विहितमस्ति। तत्रापि प्रसिद्धाः मुख्याश्च शब्दाः परिभाषिताः। अर्थविशेषगौरवाः सामान्याः शब्दाः नैव परिभाषिताः। मनोहरलालद्विवेदिमहोदयेन हिन्दीभाषायामस्य कात्यायनयज्ञपद्धतिविमर्शः (सन् १९८८) इति नामकस्य ग्रन्थस्य परिशिष्टभागे कतिपयाः शब्दाः विविक्ताः सन्ति । ततो विद्याधरगौडमहाभागेन कात्यायनश्रौतसूत्रस्य व्याख्यानक्रमे सरलाभूमिकायां (सन् १९९०) केचन पदार्थास्तथा संक्षेपेण अन्ये यागीयपदार्थाश्च टिप्पणेन विविक्ताः, परन्तु न संहितागतशब्दाः परिशीलिताः।

श्रौतयागानां परिचयप्रदानाय मीमांसापण्डितेन चिन्नस्वामिना प्रणीते यज्ञतत्त्वप्रकाशे (सन् १९९२) अपि श्रौतयागसम्बद्धाः केचन पारिभाषिकशब्दाः परिशीलिता दृश्यन्ते।

ऐतरेयब्राह्मणस्य(वि.सं.२०४०) परिशिष्टभागे सम्पादकमहोदयेन कतिपयानां शब्दानामर्था उल्लिखिताः, न तु सर्वेषाम्। तत्र भवताऽऽचार्यवर्येण ऋग्वेदभाष्ये प्रसङ्गपतिताः कतिपयाः पारिभाषिकशब्दा अर्थदृष्ट्या परिशीलिताः।

आश्वलायनश्रौतसूत्रस्य (सन् १९८४-१९८५) भाष्ये च मध्ये मध्ये पारिभाषिकशब्दानां निर्वचनं दृश्यते। अतो विषयगाम्भीर्येण दुरूहेऽस्मिन् वेदमन्त्रार्थज्ञानविषये न प्रायः समीक्षकाणामनुसन्धातृणाञ्च रुचिर्दृश्यते। अत एव कतिपयानां शुक्लयजुर्वेदीयपारिभाषिकशब्दानामध्ययनं नितरामावश्यकमिति मत्वा मदीया प्रवृत्तिर्जाता।

## १.७. शोधपत्रस्यौचित्यम्

सन्ति वेदसम्बद्धेषु विविधविषयेषु नैकविधविद्वद्भिर्विहितानि परिशीलनानि चिन्तनानि च। परन्तु कतिपयानां शुक्लयजुर्वेदीयपारिभाषिकशब्दानां परिशीलनात्मकमध्ययनं नैव जातं दृश्यते। प्रस्तुतेऽस्मिन् शोधप्रबन्ध उक्तविषयकं सप्रमाणं परिशीलनात्मकमध्ययनं विवेचनञ्च विहितमस्ति। शुक्लयजुर्वेदीयानां पारिभाषिकशब्दानां परिशीलनं केन्द्रीकृत्य विहितं शोधकार्यमिदं प्रथममिव प्रतिभाति। फलतः शोधकार्यमिदमौचित्यपूर्णमस्ति।

## १.८. अध्ययनस्य सीमाङ्कनम्

वैदिकवाङ्मये सन्त्येनेके विषयाः प्रतिपादिताः विवृताश्च। तेषु च नैकान् विषयानवलम्ब्य शक्यते कर्तुं परिशीलनं समीक्षणात्मकमध्ययनञ्च। अपि त्वत्र शुक्लयजुर्वेदीयमाध्यन्दिनसंहितायाः प्रथमाध्यायादारभ्य तृतीयाध्यायपर्यन्तं संहितागतानां

कतिपयानां पारिभाषिकशब्दानां सामान्यतः परिशीलनं विहितम् । परिशीलनक्रमे उव्वटमहीधरदयानन्दानां भाष्यकाराणां भाष्यत्रयमाधृत्य अध्ययनं विहितमस्ति।

### १.९. शोधविधिः

#### १.९.१. सामग्रीसङ्कलनविधिः

प्रस्तुतस्य शोधप्रबन्धस्य कृत आवश्यकसामग्रीणां सङ्कलनाय पुस्तकालयीयाध्ययनविधिरेव प्रामुख्येनावलम्बितो वर्तते। सामग्रीं विना न किमप्यनुसन्धानं पूर्णं भवति । एकस्मिन् एव पुस्तकालये आवश्यक्यः सामग्र्यः प्रायो न लभ्यन्ते । अतोऽनेकानां पुस्तकालयानामुपयोगो तत्र क्रमे विहितः । तत्र च तावन्निर्मिते शोधप्रबन्धे वेदसम्बद्धास्तत्रापि विशेषतो मन्त्रभाष्यग्रन्थाः संस्कृतमूलग्रन्थाश्च प्राथमिकसामग्रीत्वेन स्वीकृताः, अर्थनिर्वचनमाधारीकृत्य विविधप्राच्यप्रतीच्योभयविधविद्याविशारदैरनसूयुभिर्विद्वद्भिः सह संवादादिकं विधाय च सामग्रीसङ्कलनं विहितमस्ति।

#### १.९.२. अध्ययनविश्लेषणविधिः

प्रस्तुतेऽस्मिन् शोधप्रबन्धे परिशीलनात्मकविश्लेषणविधिरवलम्बितो वर्तते । अत्र च तावच्छोधप्रबन्धे यथावश्यकमागमनात्मकविधेर्निगमनात्मकविधेश्च प्रयोगं विधाय व्याख्यात्मको विधिश्च प्रयुक्तः।

### १.१०. शोधपत्रस्य स्वरूपम्

शोधप्रबन्धस्य बाह्यसंरचनायाः सुव्यवस्थायै अध्ययनसौकर्याय वा प्रस्तुतोऽयं शोधप्रबन्धोऽधोनिर्दिष्टेषु पञ्चस्वध्यायेषु यथावश्यकं शीर्षकोपशीर्षकेषु च विभक्तोऽस्ति :-

प्रथमोऽध्यायः –शोधप्रबन्धपरिचयः

द्वितीयोऽध्यायः –वैदिकवाङ्मयस्य संक्षिप्तपरिचयः

तृतीयोऽध्यायः –दर्शपौर्णमासेष्टिगतानां पारिभाषिकशब्दानां परिशीलनम्

चतुर्थोऽध्यायः –पिण्डपितृयज्ञाग्न्याधानचातुर्मास्यादिगतानां पारिभाषिकशब्दानां परिशीलनम्

पञ्चमोऽध्यायः –उपसंहारः।

परिशिष्ट–खण्डः

खण्डेऽस्मिन् नामानुक्रमणिकया सह उपयोजितग्रन्थानां सूची संस्थापिता विद्यते।

एवं प्रकारेण पञ्चाध्यायान् परिशिष्टखण्डेन संयुज्य शोधप्रबन्धोऽयं पूर्णतां यातोऽस्ति।

## *।। इति प्रथमोऽध्यायः ।।*

# द्वितीयोऽध्यायः

## वैदिकवाङ्मयस्य संक्षिप्तपरिचयात्मकः

### २.१ वेदस्वरूपम्

वेदाः पौरस्त्यसाहित्यानामाधारशिला महानिधयश्च मन्यन्ते। वैदिकवाङ्मयस्याध्ययनक्रमे मनसि को नाम वेद इति जिज्ञासा विजृम्भते। तां समाधानाय वेदशब्दस्य व्युत्पत्तिप्रदर्शनपूर्वकम् अर्थनिर्देशमावश्यकं भवति । वैयाकरणसिद्धान्तकौमुद्याम् आद्युदात्तस्य वेदशब्दस्य चतुर्ष्वर्थेषु प्रयोगो विहितो दृश्यते, यथा—

क) सत्तार्थकात् विद्धातोर्घञ्प्रत्ययेन निष्पन्नस्य वेदशब्दस्याऽर्थः— विद्यते सत्तां गृह्णाति वस्तु अनेनेति वेदः।

ख) ज्ञानार्थकात् विद्धातोर्घञ्प्रत्ययेन निष्पन्नस्य वेदशब्दस्याऽर्थः — विदन्त्येभिः धर्मब्रह्मणी क्रियाज्ञानमयं ब्रह्म वेति वेदः।

ग) विचारार्थकाद् विद्धातोरच्प्रत्ययेन निष्पन्नस्य वेदशब्दस्याऽर्थः — विन्ते विचारयति धर्मब्रह्मणी क्रियाज्ञानमयं ब्रह्म वेति वेदः।

घ) लाभार्थकात् विद्धातोर्घञ्प्रत्ययेन निष्पन्नस्य वेदशब्दस्याऽर्थः — विदन्ते स्वरूपं लभन्ते वस्तु अनेनेति वेदः।

**सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे।**

**विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात्॥**[1]

---

१ सिद्धान्तकौमुदी, पृ. ४२१।

ऋग्वेदभाष्यभूमिकायां सायणाचार्येण इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः[२] इति निर्दिष्टः। प्रत्यक्षेणानुमानेन वा दुर्बोधोऽज्ञेयश्चोपायः स्वयं वेदेन बोध्यते। अतः एवाऽस्ति वेदस्य वेदता। मनुनोक्तं यत् —

**प्रत्यक्षेणानुमित्या वा यस्तूपायो नविद्यते।**

**एनं विदन्ति वेदेन तस्मात् वेदस्य वेदता॥**

श्रीमता स्वामिदयानन्दसरस्वतिमहाभागेन ऋग्वेदादिभाष्यभूमिकायामुक्तं यत्— कथं वेदः श्रुतिश्च द्वे नाम्नी ऋक्संहितादीनां जाते इति अर्थवशात्। विद ज्ञाने, विद सत्तायाम्, विद्लृ लाभे, विद विचारणे एतेभ्यो धातुभ्यो 'हलश्च' इति सूत्रेण करणाधिकरणकारकयोर्घञ्प्रत्यये कृते वेदशब्दः साध्यते। विदन्ति जानन्ति, विद्यन्ते भवन्ति, विन्दन्ति विन्दन्ते लभन्ते, विन्दते विचारयन्ति सर्वे मनुष्याः सर्वाः सत्यविद्या यैर्येषु वा तथा विद्वांसश्च भवन्ति ते वेदाः इति।[३] आपस्तम्बश्रौतसूत्रे उक्तं यत्— मन्त्रब्राह्मणयोर्वेदनामधेयम्। एतादृशा परमात्मनो निःश्वासरूप ऋषिभिः स्वतपसा साक्षात्कृतोऽपौरुषेयो मन्त्रब्राह्मणात्मकशब्दराशिर्वेद इति ज्ञातुं शक्यते।

## १.२ वेदमहत्त्वम्

परमात्मनो निःश्वासभूतो वेदोऽपौरुषेयो मन्यते। अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः।[४] महर्षिभिः स्वतपसा साक्षात्कृत्य वेदज्ञानमवरेभ्यः प्रदत्तम्। मानवा वेदज्ञानादेव धर्माधर्माचारविचारसभ्यतासंस्कृतीनां निर्णयं कृत्वाऽऽचरन्ति। यथा रूपादिज्ञानाय चक्षुरादीन्द्रियाण्यपेक्ष्यन्ते, तथैव प्रत्यक्षादिभिः

---

२ तैत्तिरीयसंहिता, भाष्यभूमिका, पृ.२।

३ ऋग्वेदभाष्यभूमिका, पृ.२९।

४ बृहदारण्यकोपनिषद्, २.४.१०।

प्रमाणैरज्ञातार्थाज्ञापनाय वेदस्यावश्यकता भवति । अत एव अज्ञातार्थज्ञापको वेदस्तज्ज्ञानान्मुक्तिरिति ।

वेदो देवपितृमनुष्याणां सनातनचक्षुरिति महर्षीणामुक्तिः । देवपितृमनुष्याणां वेदश्चक्षुः सनातनम् ।[५] कालत्रयेऽप्यस्य प्रामाण्यं निराबाधम् । भूतं भव्यं भविष्यञ्च सर्वं वेदात् प्रसिद्ध्यति।[६] आस्तिकदृष्टिसम्पन्ना महानुभावा एव शब्दब्रह्मरूपं ज्ञानं वैदिकरहस्यञ्च ज्ञातुं प्रभवन्ति । वेदव्याख्यानाधिकारिणश्च त एव । अथापि प्रत्यक्ष्यकृताः स्तोतारो भवन्ति ।[७] पुरुषार्थचतुष्टयस्य साधको वेद अक्षय्यज्ञानरूपो रत्नाकरो वर्तते । परमात्मना सृष्टिव्यवस्थापनाय धर्मब्रह्मप्रतिपादको वेदो ब्रह्मणे अदायि । यो ब्रह्माणं विदधाति पूर्वं यो वै वेदाँश्च प्रहिणोति तस्मै .... ।[८] वेदज्ञानानुसारेण ब्रह्मणा सृष्टिर्विस्तारितेति वेदराद्धान्तः ।

वेदस्याऽसाधारणशक्त्या न केवलं भूतवर्तमानभविष्यत्कालेषु जायमाना घटना ज्ञायन्ते । अपि तु सूक्ष्मं व्यवहितं विप्रकृष्टमर्थमपि वेदादेव ज्ञातुं शक्यते । चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवं जातीयकमर्थं शक्नोत्यवगमयितुम् ।[९] वेदभाष्यकारः सायणाचार्यो वेदस्याकुण्ठितां शक्तिं निरूपयति । यथा सूर्यचन्द्रादीनां स्वप्रकाशशक्तिरकुण्ठिता, तथैव वेदस्यापि स्वप्रतिपादकत्त्वशक्तिः प्रसिद्धेति । **यथा घटपटादिद्रव्याणां स्वप्रकाशकत्वाभावेऽपि सूर्यचन्द्रादीनां स्वप्रकाशकत्वमविरुद्धम्, तथा मनुष्यादीनां स्वस्कन्धाधिरोहासंभवेऽपि अकुण्ठितशक्तेर्वेदस्य इतरवस्तुप्रतिपादकत्ववत् स्वप्रतिपादकत्वमप्यस्तु । अत एव संप्रदायविदोऽकुण्ठितां शक्तिं वेदस्य दर्शयन्ति ।**[१०] कस्यापि वस्तुनश्चक्षुषा स्वरूपज्ञानाय सूर्यप्रकाशस्य प्रामाण्यं भवति, तथैव धर्माधर्मयोर्ज्ञाने वेदः स्वतःप्रमाणं भवति । श्रीमद्भगवत्पादानामाशयः– वेदस्य हि

५ मनुस्मृतिः, १२.९४ ।
६ पूर्ववत् १२.९७ ।
७ निरुक्तम्, ७.१.२ ।
८ श्वेताश्वतरोपनिषद्, ६.१८ ।
९ शाङ्करभाष्यम्, १.१.२ ।
१०सायणः, ऋग्वेदभाष्योपक्रमणिका, पृ. ५ ।

धर्माधर्मयोर्निरपेक्षं प्रामाण्यं रवेरिव रूपविषये ।[११] अर्थात् वेदस्य स्वतःप्रामाण्यमस्ति नहि तत्रेतरप्रमाणस्यावश्यकता । प्राणिनामैहिकामुष्मिककल्याणसाधनाय प्रवृत्तेऽस्मिन् वेदे ज्ञानविज्ञानकलाशिल्पादिविषयाणां प्रतिपादनं दृश्यते। विशेषतया वेदे कर्मणामुपासनानां ज्ञानानां च विवेचनं प्राप्यते । धर्मानुष्ठानेश्वरोपासनायोगाभ्यासविद्याभ्यासब्रह्मचर्यपालनादिभिर्विविधैः सत्कार्यैर्वेदस्तुरीयपुरुषार्थं प्रति मानवं प्रेरयति।

वेदोत्पत्तिविषये विचारकेषु मनीषिषु मतैक्यं नैव दृश्यते। तत्र पाश्चात्त्या विद्वांसस्तथा तत्प्रभाप्रभावितान्तःकरणाः पौरस्त्या वेदोत्पत्तेः समयं निर्धारयितुं कृतप्रयत्ना अपि नैव सफलतामभजन्। वस्तुतः पौरस्त्यास्तपःपूता महर्षयो वेदोपासका मनीषिणो वेदसम्प्रदायविदश्च वेदं नित्यत्वेनापौरुषेयत्वेन सनातनेश्वरीयज्ञानत्वेन च स्वीकुर्वन्ति । यथा परमात्मा अनाद्यनन्ताविनश्वरस्तथैव वेदोऽपि परमात्मनो निश्वासरूपत्वाद् अनाद्यनन्ताविनश्वरः। सृष्ट्यादौ परमात्मा ब्रह्मणः सृष्टिं कृत्वा तस्य हृदये वेदज्ञानं प्रादात्। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदाँश्च प्रहिणोति तस्मै....।[१२] तदनन्तरं ब्रह्मपरम्पराप्राप्तं शब्दराश्यात्मकं वेदं ऋषयः स्वतपसा साक्षात्कृतवन्तः। एते महर्षयोऽसाक्षात्कृतेभ्यो महर्षिभ्य उपदेशेन वेदमन्त्रान् प्रददुः। उपदेशाय च येऽसमर्थास्तेषां कल्याणाय वेदाङ्गानि उपदिदिशुः । साक्षात्कृतधर्माण ऋषयो बभूवुः ....।[१३] शिष्यप्रशिष्यक्रमेणोपदेशपरम्परया सहस्रशाखासु विस्तृतो वेदः स्वमहिम्ना जगति प्रसिद्धः । निष्कारणमेव वेदाध्ययनं द्विजानां कर्तव्यत्वेन प्रसिद्धमेव। ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च ।[१४] प्रमाणापेक्षाभावात् स्वतःप्रमाणस्य वेदस्यापरं नाम श्रुतिरिति प्रसिद्धा– आदिसृष्टिमारभ्याद्यपर्यन्तं ब्रह्मादिभिः सर्वाः सत्यविद्याः श्रूयन्ते अनया सा श्रुतिः ।[१५]

---

११ ब्रह्मसूत्रशाङ्करभाष्यम्।

१२ श्वेताश्वतरोपनिषद्, ६.१८।

१३ निरुक्तम्, १.६।

१४ पस्पशाह्निकम्।

१५ ऋग्वेदभाष्यभूमिका, पृ.२८२।

श्रवणार्थकाच्छ्रुधातोः क्तिन्प्रत्ययेन निष्पन्नस्य श्रुतिशब्दस्यार्थो 'गुरुपरम्परया श्रुतिमाध्यमेन गृहीतं मन्त्रब्राह्मणपरं शब्दराश्यात्मकं ज्ञानम्' इति निष्पद्यते।

### १.३ ऋग्वेदपरिचयः

ऋच्यते स्तूयतेऽनया सा ऋक् । तादृशीनामृचां समूह एव ऋग्वेदः । यत्रार्थवशेन पादव्यवस्था सा ऋगिति।[16] पादेनार्थेन चोपेता वृत्तबद्धामन्त्रा ऋचः।[17] यथा—

**यः कश्चित्पादवान्मन्त्रो युक्तश्चाक्षरसम्पदा।**

**स्वरयुक्तोऽवसाने च तामृचं परिजानते॥**

ऋचां समूहात्मको वेद ऋग्वेदः। चतुर्षु वेदेषु ऋग्वेदः प्राथम्यं भजते, यथा—

**तस्माद् यज्ञात् सर्व्वहुतऽऋचः सामानि जज्ञिरे।**

**छन्दांसि जज्ञिरे तस्मात् यजुस्तस्मादजायत॥**

ऋग्वेदः सोऽयं मण्डलानुवाकवर्गभेदेन अष्टकाध्यायसूक्तभेदेन च द्विधा। तत्र प्रथमभेदे बालखिल्यसूक्तानि विहाय सम्पूर्णायामृग्वेदसंहितायां दशमण्डलानि, पञ्चाशीतिश्चानुवाकाः, अष्टोत्तरशतद्वयमिताश्च वर्गाः सन्ति । द्वितीयभेदेऽष्टौ अष्टकानि, चतुष्षष्टिरध्यायाः, सप्तदशोत्तरसहस्राणि च सूक्तानि सन्ति।

महाभाष्यकारेण पतञ्जलिना ऋग्वेदस्य २१ (एकविंशति) शाखानामुल्लेखो विहितः, किन्तु शौनकेन स्वकीये चरणव्यूहग्रन्थे स्वीकृतं यदृग्वेदस्य प्रामुख्यम्भजमानाः शाकल–बाष्कल–

---

१६ जैमिनीयन्यायमाला, २.१.३.५.१०।

१७ आपस्तम्बपरिशिष्टम्, ३.१।

आश्वलायन-शाङ्खायन-माण्डुकेयाख्याः पञ्च शाखास्तत्र सम्प्रति केवलं शाकलशाखैवोपलभ्यते।

## १.४ यजुर्वेदपरिचयः

यज्धातोरुसि प्रत्यये निष्पन्नो यजुश्शब्दो विभिन्नमर्थं सूचयति । आचार्यो यास्को यज्ञीयमन्त्राणां यजुस्संज्ञां प्रयुङ्क्ते- यजुर्यजतेः । इज्यते अनेन इति यजुः । अर्थात् यैर्मन्त्रैर्यज्ञः सम्पाद्यते, ते मन्त्रा यजुस्संज्ञकाः । अनियताक्षरावसानो यजुः अर्थात् येषु मन्त्रेष्वक्षरसंख्यया पादव्यवस्थाभावस्तादृशो गद्यात्मको मन्त्रभागो यजुश्शब्देनाभिधीयते। सामान्यतया ऋक्सामभिन्नो गद्यात्मके मन्त्रभेदे जैमिनिना च यजुश्शब्दः प्रयुक्तः- शेषे यजुः शब्दः[१८] अर्थात् ऋक्सामभ्यां यदन्यत् प्रश्लिष्टपठितं मन्त्रजातं तद्यजुः। शौनकीयचरणव्यूहपरिशिष्टे चाह :-

त्रिगुणं पठ्यते यत्र मन्त्रब्राह्मणयोः सह।

यजुर्वेदः स विज्ञेयः शेषाः शाखान्तराः स्मृताः ॥

इत्थञ्चाभिप्रायम्- यत्र मन्त्रब्राह्मणयोः सहैव संहितापदक्रमरूपस्त्रिगुणः पाठो विधीयते, तादृग्यजुर्वेदो ज्ञेयः।

यजुर्वेदो द्विप्रकारकः, कृष्णयजुः शुक्लयजुश्च । पौराणिकाः कथयन्ति— व्यासो वैशम्पायनाय वेदं प्रोवाच, स स्वशिष्याय याज्ञवल्क्याय। कुतोऽपि कारणाद् रुष्टो वैशम्पायनो याज्ञवल्क्यमुवाच— देहि मदधीतं वेदमिति। याज्ञवल्क्यो गुरुवचनपालनाय ततोऽधीतं वेदं सद्यो वान्तवान्। अन्ये वैशम्पायनशिष्यास्तित्तिरिरूपं धृत्वा याज्ञवल्क्येन वान्तं वेदं गृहीतवन्तः। स एवायं वान्तगृहीतो वेदः कृष्णयजुर्वेदः।

---

१८ मीमांसासूत्रम्, २.१.३७।

वैशम्पायने कुपिते ततोऽधीतं वेदं विसृज्य याज्ञवल्क्यः पुनर्वेदाधिगतयो सूर्यमाराधयामास, ततश्च वेदमाप, ततोऽयं वेदः शुक्लयजुर्वेदनाम्नाऽप्रथत। अनयोर्वेदयोर्महदन्तरम्।

शुक्लयजुर्वेदे विनियोगवाक्यरहिताः केवला मन्त्रा विद्यन्ते, कृष्णयजुर्वेदे तु विनियोगवाक्यानि मन्त्राश्च । अतोऽमिश्रितरूपतया शुक्लयजुर्वेदः, मिश्रितरूपतया च कृष्णयजुर्वेद इति संज्ञा जातेत्यपि लोकाः कथयन्ति।

## १.४ सामवेदपरिचयः

गीतिरूपाऋङ्मन्त्रा साम । साम्नः कृतेगीतियुक्तत्वमनिवार्यम् । ऋग्वेदस्य मन्त्रा यदा विशिष्टगानपद्धत्या गीयन्ते, तदा तेषां नाम साम इति जायते। यथा–

गीतिरूपा मन्त्राः सामानि। गीतिषु सामाख्या। आंगूष्यं साम।

अत्र आंगूष्यपदेन स्तोत्ररूपो गीतिरूपो मन्त्रो बोध्यते। सा ऋक् (पत्नी), अम्(गानम्) पुरुषः साम इति। यथा– या ऋक् तत् साम। ऋचि अध्यूढं साम। अमोऽहमस्मि सा त्वम् सामाहमस्मि ऋक् त्वम् द्यौरहं पृथिवी त्वम्। सा च अमश्चेति तत् साम्नः सामत्वम्। वेदेषु सामवेदस्यातीव महत्त्वमस्ति। सामवेदः वेदानां सारः इति। यथा– सर्वेषां वा एव वेदानां रसो यत् साम।[१९] साम विना यज्ञ नैव पूर्णो भवतीति शतपथब्राह्मणमुद्घोषयति– न साम यज्ञोऽस्ति। सामवेदस्य गानप्रचुरता प्रथिता, ऋच एव गीयन्ते, सामवेदे १५४९ मन्त्राः सन्ति। तेषु ७५ मन्त्राः ईदृशाः सन्ति, ये ऋग्वेदे न प्राप्यन्ते। शेषाः सर्वेऽप्युभयवेदसाधारणाः। सामवेदगतमन्त्राणां सप्तस्वराः यतस्ते गीयन्ते, ऋग्वेदेन पुनस्तेषामेव मन्त्राणां त्रय एव स्वराः एतावानेव उभयवेदसाधारणानां साममन्त्राणामृग्वेदमन्त्रभ्यो वेदः। सामवेदो द्विधा विभज्यते– पूर्वार्चिकम्

---

१९ शतपथब्राह्मणम्. १२.८.३.२३।

उत्तरार्चिकञ्च । पूर्वार्चिकमेव छन्दः, छन्दसी, छन्दसिका चेति त्रिभिरपि नामभिरभिधीयते । विषयानुसारं पूर्वार्चिकं चतुर्षु भागेषु विभज्यते । आग्नेयपर्व, ऐन्द्रपर्व, पावमानपर्व, आरण्यकपर्व च । उत्तरार्चिकन्तु अनुष्ठाननिर्देशकम् । तस्य बहवो विभागाः– दशरात्रम्, सम्वत्सरम्, ऐकाहम्, अहीनम्, सत्रम्, प्रायश्चित्तम्, क्षुद्रञ्चेति प्रमुखास्तत्रभेदाः ।

### १.६ अथर्ववेदपरिचयः

अभिचारक्रियायाः प्राधान्येन प्रतिपादकोऽयं वेदोऽथर्वाख्येनर्षिणा दृष्टत्वात् अथर्ववेद इत्युच्यते । वेदेऽस्मिन् २० काण्डानि, ७३१ सूक्तानि, २९८७ मन्त्रा विद्यन्ते । एषु मन्त्रेषु द्वादशशतमन्त्रा ऋग्वेदेऽपि दृश्यन्ते । विंशकाण्डे १५३ सूक्तानि सन्ति, तेषु द्वादशसूक्तान्यतिरिच्य शेषाणि सर्वाण्यपि ऋग्वेदस्य दशममण्डले समुपलभ्यन्ते । अथर्ववेदस्य नव शाखा आसन्, परं सम्प्रति शौनक–पिप्पलाद–समाख्ये द्वे एव शाखे प्राप्येते । प्रचलिता अथर्वसंहिता शौनकशाखान्तर्गता पैप्पलादशाखासंहिताऽपि अनतिचिरेणैव मुद्रिता ।

### १.७ ब्राह्मणम्

वृद्ध्यर्थकाद् बृम्ह् (बृहि) इत्यस्माद्धातोः[२०] मनिनि, नकारस्य स्थाने अकारादेशे यणि च ब्रम्हन् इति निष्पन्नेऽण्प्रत्ययेन ब्राह्मणशब्दं साधयन्ति विवेचकाः । ब्राह्मणशब्दस्य सन्ति विविधार्थाः, परं प्रसिद्धतया ब्राह्मणशब्दो जातिपरं ग्रन्थपरञ्चेति द्विविधमर्थं प्रकाशयति । जातिपरो ब्राह्मणशब्दः पुंसि प्रयुज्यते चेत् वेदैकदेशबोधको ब्राह्मणशब्दः क्लीबे प्रयुज्यते, मेदिनीकार आह–

ब्राह्मणं ब्रह्मसंघाते वेदभागे नपुंसकम् इति ।

---

२० सिद्धान्तकौमुदी, सू.सं.७.३६ ।

ब्राह्मणानि =मन्त्राः, संहन्यन्ते = स्पष्टीक्रियन्ते, व्याख्यायन्ते वा यस्मिन् तादृशो वेदभागो ब्राह्मणम् इति ।[21] श्रीधरशास्त्रिमहाभागो ब्राह्मणशब्दस्य व्युत्पत्तिं दर्शयन्नाह – ब्रह्मणो वेदस्य मन्त्रराशेरिदं नाम यज्ञक्रियावस्तुतत्वादिनिरूपकं प्रवचनं ब्राह्मणम्[22]। तत्र भवता सायणाचार्येण वेदस्य धर्मब्रह्मणीति विषयद्वयं प्रत्यपादि । तयोः शतपथादिग्रन्थेषु प्रत्यक्षरूपेण परोक्षरूपेण च तत्त्वख्यापनाद् ब्राह्मणमिति संज्ञा ।

शतपथानुसारं ब्राह्मणशब्दस्यार्थो मन्त्रः[23] तथा यज्ञश्च[24] भवति । भट्टभास्करः यज्ञीयकर्मणां मन्त्राणाञ्च व्याख्यानग्रन्थो ब्राह्मणमिति परिभाषते – ब्राह्मणं नाम कर्मणस्तन्मन्त्राणाञ्च व्याख्यानग्रन्थः ।[25] ब्राह्मणग्रन्थाः कर्मस्वरूपं विस्तार्य तदपेक्षितद्रव्यदेवतादीनामङ्गकलापानां विधानं कुर्वन्ति । कष्टसाध्येऽस्मिन् श्रौते कर्मण्यलसस्वभावानां मानवानां प्रवृत्त्यनुदयात् तत्सम्पादनार्थं विहितकर्मस्तावकत्वं ब्राम्हणग्रन्थानां कार्यमस्ति ।

ब्राह्मणग्रन्थाः विधिप्रधानाः विधिवाक्यानां निराकाङ्क्षतया विधानं कुर्वन्ति । सर्वेऽपि वेदविभागाः विधिमूलकाः । विधिमुपजीव्यैव मन्त्रादीनां प्रवृत्तिर्दृश्यते । विधिरहितानां मन्त्रनामधेयनिषेधार्थवादानां न हि स्वरूपलाभः । विधिः प्रमाणान्तरेणाप्राप्तमर्थं बोधयति । अज्ञातार्थज्ञापकत्वमिति लक्षणमपि विधावेव घटते ।[26] वेदतत्त्वज्ञानाय मन्त्र अर्थवादो वा न हि समर्थः । विधिभाग एव सहायकः । मन्त्रभागस्यार्थवादभागस्य च लक्षणायाः व्यञ्जनायाश्च सहाय्येनार्थसङ्गतिः सुस्थिरा भवति । परं विधिभागस्यार्थसङ्गतिस्तु मुख्यार्थेन भवति । यथा

---

२१ शतपथब्राह्मणम्, उपोद्घातम्, पृ. ११ श्रीधरशास्त्री ।

२२ पूर्ववत् पृ. ९ ।

२३ शतपथब्राह्मणम्. ७.१.१.५ ।

२४ पूर्ववत्, ३.१.४.१५ ।

२५ तैत्तिरीयसंहिता,१.५.१ (भाष्ये) ।

२६ अर्थसंग्रहः.पृ.३६ ।

आयुर्वेदे– अग्निर्हिमस्य भेषजम्इत्यत्र अग्निशब्दस्य लक्षणार्थो माणवकः, व्यञ्जनार्थस्तु शुचितादिर्ज्ञेयः । साहित्यशास्त्रे लक्षणाव्यञ्जनयोः प्रयोगे सत्यपि विधिभागे लक्षणाव्यञ्जनयोः ग्रहणं व्यवहारविरुद्धमसङ्गतञ्च । उक्तोदाहरणेऽभिधेयार्थ एव ग्राह्यः, अत्र अग्निशब्दस्याभिधेयार्थो वह्निरेव । तथैव मन्त्रस्यार्थवादस्य च विधिवाक्यार्थेन सह विरोधाभावतयार्थसङ्गतिः कर्तव्या । तदैव विधिवाक्यस्योपादेयतार्थवत्ता च सुसङ्गता भवति ।

सर्वेऽपि ब्राह्मणग्रन्थाः विधिवाक्यमुपजीव्यैवार्थवादस्यार्थवत्तां स्वीकुर्वन्ति । प्राचीनैर्वेदभाष्यकारैश्च विधिभागमनुलक्ष्य मन्त्रभागस्य भाष्यानि रचितानि । मन्त्रस्वरूपं सर्वथा व्याकर्तुं विधिभाग उपयुज्यते ।

### १.८ ब्राह्मणवैशिष्ट्यं महत्त्वञ्च

ब्राह्मणग्रन्थानां विषयविवेचनावसरे आचार्यः कात्यायनः ब्राह्मणं दशधा व्यभजत् । यथा– विधिर्निन्दाप्रशंसाऽध्यात्ममधियज्ञमधिदैवतमधिभूतमनुवचनपरकृतिः पुराकल्पः सृष्टिरिति ब्राह्मणम् ।[२७] भगवती श्रुतिरप्याह– इतिहासः, पुराणम्, विद्या, उपनिषदः, श्लोकाः, सूत्राण्यनुव्याख्यानानि ।[२८] शबरस्वामी आह –

> हेतुर्निवचनं निन्दा प्रशंसा शंसयो विधिः ।
>
> परक्रिया पुराकल्पो व्यवधारणकल्पना ॥
>
> उपमानं दशैते तु विधयो ब्राह्मणस्य तु ।[२९]

तथैव वाचस्पतिमिश्रः –

---

२७ प्रतिज्ञापरिशिष्टम् ।

२८ बृहदारण्यकोपनिषद्, २.४.१० ।

२९ मीमांसासूत्रम्, २.१.८ ।

नैरुक्त्यं यस्य मन्त्रस्य विनियोगः प्रयोजनम्।

प्रतिष्ठानं विधिश्चैव ब्राह्मणं तदिहोच्यते॥

उपर्युक्तैः प्रमाणैः कात्यायनादयो महर्षयो ब्राह्मणविषयविभागं चक्रुः । ब्राह्मणग्रन्थेषु विषयबाहुल्यं विवेचनवैविध्यञ्च प्राप्येते । ब्राह्मणग्रन्थेषु विविधश्रौतयागानां सविशदं विवेचनं विद्यते । यज्ञीयक्रियाकलापानां साङ्गं वर्णनमप्यत्रैव प्राप्यते । दर्शपौर्णमासमारभ्य सर्वेषामेव श्रौतयागानां वैज्ञानिकं विवेचनं निगूढं शास्त्रीयरहस्यञ्च ब्राह्मणग्रन्थादेवावगम्यते । शब्दनिर्वचनशास्त्रस्य मूलमपि ब्राह्मणमेव । इदमेव ब्राह्मणमाधारीकृत्य निरुक्तशास्त्राणि पल्लवितानि । पुराणादिषु वर्णितानामाख्यानोपाख्यानानां मूलतत्वं ब्राह्मणाध्ययनेनावगम्यते । पुराणकाव्यनाटकेषु विलसितानां रमणीयकथाकलापानां मूलं स्रोतो ब्राह्मणमेव।

शतपथब्राह्मणादिग्रन्थेषूपदिष्टा वेदिनिर्माणादिविधयः शुल्वसूत्राणां रेखागणितानाञ्चोपजीव्यविषयाः सन्ति । ब्राह्मणेषूपदिष्टाः कृषिवाणिज्यव्यापारादिविषया अर्थशास्त्रीयदृष्ट्या महत्त्वाधायकाः सन्ति । भाषा च व्याख्यानपरा सरला सरसा च विद्यते । ब्राह्मणग्रन्थेषूपदिष्टा नीतिशिक्षा–आचारशिक्षा–ब्रह्मचिन्तन–आत्मज्ञानादिविषयाः पौरस्त्यजीवनपद्धतेः जीवनम् । संहितातः ब्राह्मणग्रन्थानां पार्थक्यं विविधविषयेषु वर्तते । संहिताग्रन्थाः गद्यपद्यगीत्यात्मकाः सन्ति चेत् ब्राह्मणानि सर्वथा गद्यात्मकानि सन्ति।

### १.५ ब्राह्मणग्रन्थाः

सन्ति ब्राह्मणानि बहूनि, परं सर्वाणि नोपलभ्यन्ते। समुपलब्धानां नामानि यथा –

| | |
|---|---|
| ऐतरेयब्राह्मणम् | ऋग्वेदीयम् |
| शांखायनब्राह्मणम् | ऋग्वेदीयम् |
| शतपथब्राह्मणम् | शुक्लयजुर्वेदीयम् |

| | |
|---|---|
| तैत्तिरीयब्राह्मणम् | कृष्णयजुर्वेदीयम् |
| ताण्ड्यब्राह्मणम् | सामवेदीयम् |
| षड्विंशब्राह्मणम् | " |
| सामविधानब्राह्मणम् | " |
| आर्षेयब्राह्मणम् | " |
| दैवतब्राह्मणम् | " |
| उपनिषद्ब्राह्मणम् | " |
| संहितोपनिषद्ब्राह्मणम् | " |
| वंशब्राह्मणम् | " |
| जैमिनीयब्राह्मणम् | " |
| गोपथब्राह्मणम् | अथर्ववेदीयम् |

अन्यानि च ब्राह्मणानि करालकालकवलीकृतत्वादिदानीमनुपलब्धान्येव।

### १.१० आरण्यकपरिचयः

अरण्ये भवमारण्यकम् इति व्युत्पत्त्या अरण्यशब्दात् तत्र भव इति सूत्रेण वुञ् प्रत्यये कृते आरण्यकशब्दो निष्पद्यते । आरण्यकग्रन्थाः ब्राह्मणग्रन्थानामभिन्नग्रन्थाः वर्तन्ते । येषु सर्वत्र ब्राह्मणग्रन्थापेक्षयाभिन्नाः विषयाः प्रतिपादिताः । सायणाचार्यमतानुसारेण अरण्ये एवाध्ययनमन्त्रयोग्यत्वादेतेषां ग्रन्थानां नामानि आरण्यक इति। उक्तञ्च तैत्तिरीयारण्यके –

अरण्याध्ययनादेतद् अरण्यकमितीर्यते।

अरण्ये तदधीयीतेत्येवं वाक्यं प्रवक्ष्यते ॥

आरण्यकग्रन्थेषु प्रायः प्राणविद्यायाः महत्त्वमुपस्थापितं दृश्यते । संहितायाः मन्त्रेष्वस्याः विद्यायाः संकेतोऽवश्यमस्ति, किन्तु आरण्यकेष्वेतेषामेव विद्याबीजानां स्फुरणमस्ति।

ऐतरेयारण्यकं, शांखायनारण्यकञ्चेति ऋग्वेदस्य आरण्यकद्वयं प्रसिद्धमस्ति। यजुर्वेदस्य बृहदारण्यकं तैत्तिरीयारण्यकञ्चेति आरण्यकद्वयम्।

सामवेदस्य तवल्कारारण्यकं जैमिनीयोपनिषद्ब्राह्मणम् इति नाम्नाऽप्युच्यते।

अथर्ववेदस्य किमपि आरण्यकम् नोपलभ्यते।

## १.११ उपनिषद्

उपनिषदः पराविद्येति पदेन व्यपदिश्यन्ते । उपनिषदो वेदान्तपदेनापि व्यवह्रियन्ते । उपनिषच्छब्दस्य रहस्यमर्थः, अध्यात्मविद्यारहस्यप्रतिपादका वेदभागा उपनिषदः कथ्यन्ते । तासु महर्षय आध्यात्मिक्या विद्यया गूढतमानां रहस्याणां विशदतया विचारं कुर्वाणाः प्राप्यन्ते । भारतीयदर्शनसाहित्ये सन्ति त्रयः प्रस्थानग्रन्थाः। ते वेदानवलम्बमाना मानवजीवनस्य चरमं लक्ष्यं तत्प्राप्तिसाधनञ्चोपदिशन्ति।

उप-नि-पूर्वकस्य विशरणगत्यवसादनार्थकस्य षद्लृ-धातोः क्विबन्तस्य रूपमिदमुपनिषदिति। उपनिषदामध्ययनेन दृष्टानुश्रविकविषयवितृष्णमुमुक्षूणां संसारस्य बीजभूता विद्या नश्यति, ब्रह्मसाक्षात्कारो भवति, दुःखानि च क्षीणानि भवन्ति । ब्रह्मणः स्वरूपस्य तदवाप्त्युपायस्य जीवस्य जगतश्च किञ्चात्मादिविषयाणां सविस्तरं वर्णनपरत्वाद् उपनिषद् इत्येषा संज्ञा युक्तैव सार्थकैवेति। इदानीमध्ययन-चिन्तन-मननपरम्परायां संरक्षिताः केचन मुख्या उपनिषद्ग्रन्थाः प्रदर्श्यन्ते।

ऋग्वेदीयोपनिषत्सु ऐतरेयोपनिषद्, कौषीतकी-उपनिषद्, कृष्णयजुर्विषयिकासूपनि- षत्सु तैत्तिरीय-महानारायण-कठ-श्वेताश्वर-मैत्रायण्युपनिषदः, शुक्लयजुस्सम्बद्धमीशावा- स्योपनिषद् बृहदारण्यकोपनिषच्चेति उपनिषद्द्वयम्, सामपरकोपनिषत्सु छान्दोग्यकेनोप- निषदौ, किञ्चाथर्वनिष्ठासु मुण्डक-माण्डूक्य-प्रश्नोपनिषदश्च नितरां प्रथिताः प्राचीनाः प्रमाणप्राप्ताः सन्ति। आचार्यः शङ्कर उपनिषत्सु यासु भाष्यं लिलेख ताः सन्ति इमाः-

ईश-केन-कठ-प्रश्न-मुण्डक-माण्डूक्य-तैत्तिरीयैतरेयच्छान्दोग्य-बृहदारण्यक-नृसिंह-पूर्वतापन्यु- पनिषदः। मुण्डकोपनिषदि उपनिषदां संख्या निम्नरूपेण वर्णिताऽस्ति।

ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरी।
ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश॥[३०]

शङ्कराचार्यभाष्यविभूषितत्वादिमा उपर्युक्ता उपनिषदोऽतिमहत्त्वं भजन्ते । लोकप्रियत्वाच्चासां पठनं पाठनञ्चाधिक्येन साम्प्रतं भवति । उपनिषत्सु काश्चनोपनिषदः पद्यात्मिकाः काश्चन गद्यात्मिकाः कश्चन गद्यपद्यात्मिका वर्तन्ते।

### १.१२ अङ्गस्योपकारकत्वम्

वेदाध्ययनक्रमे वेदाङ्गानामध्ययनमपि अत्यावश्यकं मन्यते । निष्कर्षेण तेषां स्वरूपं परिचाय्यते।

### १.१२.१. शिक्षा-

शिक्षाग्रन्था वर्णोच्चारणविधिं विशेषतो वर्णयन्ति । कथं वर्णा उच्चारणीयाः, किं तेषां स्थानम्, कश्च तत्र यत्नः, कण्ठताल्वादीनाम् उच्चारणे किं महत्त्वम्, कति वर्णाः, कथं

---

३० मुण्डकोपनिषद्, पृ. १७।

कायमारुतो वर्णत्वेन विपरिणमते, कति स्थानानि, कति स्वराः, कथं च ते प्रयोज्या इत्यादयो विषयाः शिक्षाग्रन्थेषु विविच्यन्ते । सायणेन ऋग्वेदभाष्यभूमिकायां शिक्षालक्षणम् उच्यते- स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते सा शिक्षा । तैत्तिरीयोपनिषदि शिक्षायाः स्वरूपं निरूप्यते यद्- वर्णः, स्वरः, मात्रा बलम्, साम, सन्तान इत्युक्तः शिक्षाध्यायः ।[३१] एतच्च पाणिनिना मुनिनैवं विव्रियते- वर्णः अकारादिः, स्वराः-उदात्तानुदात्त-स्वरिताः, मात्राः- ह्रस्वदीर्घप्लुताः, सन्तानः-संहितापाठम् अनुसृत्य सन्धिनियमानुकूलं पदप्रयोगः । उच्यते च पाणिनीयशिक्षायाम्-

माधुर्यमक्षरव्यक्तिः, पदच्छेदस्तु सुस्वरः ।

धैर्यं लयसमर्थञ्च, षडेते पाठका गुणाः ॥[३२]

साम्प्रतम् उपलभ्यमानेषु शिक्षाग्रन्थेषु प्रतिवेदं विभिन्नाः शिक्षाग्रन्थाः सन्ति ।

ऋग्वेदीयशिक्षाग्रन्थौ शौनक-वासिष्ठाख्यौ । यजुर्वेदीयशिक्षाग्रन्था याज्ञवल्क्य-वासिष्ठी-कात्यायनी-पाराशरीशिक्षाप्रमुखाः । सामवेदीयशिक्षाग्रन्था गौतम-शिक्षा-लोमश-शिक्षा-नारदीय-शिक्षाः । अथर्ववेदीयशिक्षाग्रन्थ माण्डूकीशिक्षा । कृष्णयजुर्वेदीयशिक्षाग्रन्थौ व्यास-भारद्वाजाख्यौ । षोडशश्लोकीशिक्षा-पाणिनीयशिक्षा-शिक्षाप्रकाशग्रन्थाः सर्ववेदविषयिणीशि- क्षाग्रन्था मन्यन्ते । वर्णोच्चारणादिविधि-ज्ञानम् अन्तरेण न शक्यो वेदानां विशुद्धः पाठोऽर्थावगमश्चेति । शिक्षा घ्राणं तु वेदस्य व्याहरता पाणिनिना शिक्षाग्रन्थानां नासिका-स्थानीयत्वं स्वीक्रियते ।

**१.१३.२ व्याकरणम्-**

व्याकरणशास्त्रस्य प्रमाणभूत आचार्यः पतञ्जलिर्व्याकरणाध्ययनप्रयोजनानि वर्णयन् चत्वारि श्रृङ्गा, चत्वारि वाक्, उत त्वः, सक्तुमिव, सुदेवोऽसि वरुण[३३]-इत्यादीन् मन्त्रानुद्धरति स्म ।

---

३१ तैत्तिरीयोपनिषद्, २.१ ।

३२ पाणिनीयशिक्षा, ३३ ।

व्याख्याञ्च तदीयां व्याकरणशास्त्रपरकाञ्चकार। व्याकरणस्य नितान्तमेवोपादेयतां श्रेष्ठताञ्च तत्र तत्रावलोक्यैव तन्महिम्नि बुधैरभिहितमिदम्–

यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम्।

स्वजनः श्वजनो माभूत्सकलं शकलं सकृच्छकृत्॥

शब्दशास्त्रमनधीत्य यः पुमान् वक्तुमिच्छति वचः सभान्तरे।

बन्धुमिच्छति वने मदोत्कटं हस्तिनं कमलनालतन्तुना॥

तस्य एतस्य व्याकरणस्य प्रयोजनविशेषो वररुचिना वार्तिके दर्शितः– रक्षोहागमलघ्वसन्देहाः प्रयोजनम् [३४] इति । व्याकरणे प्रकृतिप्रत्ययस्य विचारः, उदात्तादिस्वरविचारः, उदात्तादिस्वरसंचारनियमाः, सन्धिनियमाः, शब्दरूप–धातुरूपादिनिर्माणनियमाः, प्रकृतेः प्रत्यस्य च स्वरूपावधारणं तदर्थनिर्धारणं चेति विविधा विषया विविच्यन्ते। वेदेषु प्रकृतिप्रत्ययविचारस्य स्वरस्य च महन्महत्त्वमिति तत्र व्याकरणमेव साहाय्यम् अनुतिष्ठतीति षडङ्गेषु व्याकरणमेव प्रधानम्।

**१.१२.३ छन्दः**

छन्दोज्ञानं विना वेदार्थं निश्चेतुमपि कठिनं भवति। प्राचीना वैदिकवाङ्मयस्य विश्लेषकाः छन्दसः साहाय्येन निगूढं वेदार्थं चकासयांबभूवुः। यागसम्पादनकर्मणि महत्प्रयोजनं छन्दस इति कात्यायन उपदिशति सर्वानुक्रमण्याम्– गायत्र्यादीन्येतान्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजते याजयते तस्य ब्रह्मनिर्वीयं यातयामं भवत्यथान्तराश्वगर्ते वा पद्यते स्थाणुं वर्च्छति प्रमीयते वा पापीयान् भवति । अर्थात् यः कोऽपि याजको ऋषिच्छन्दोदैवतज्ञानं विना मन्त्राणामध्ययनम्

३३ पस्पशाह्निकम्, पृ. ३४।

३४ पूर्ववत्।

अध्यापनं यजनं याजनं वा करोति तस्य सर्वमपि कर्म निष्फलं दुष्फलं वा भवति। छन्दो ज्ञानस्य प्राशस्त्यमपि तत्रैव प्रतिपादितम् अस्तिः– विज्ञायैतानि योऽर्थवित्तस्य वीर्यवत्तरं भवति जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यते[३५]। अर्थाद् ऋषिच्छन्दोदैवतज्ञानपूर्वकं विहितं सर्वमपि यज्ञकर्म सफलं भवतीति भावः। सायणो वेदार्थं प्रकाशयितुं छन्दो महदुपकारकं भवतीति मनुते। अतिगम्भीरस्य वेदस्य अर्थमवबोधयितुं शिक्षादीनि षड्गानि प्रवृत्तानि।[३६]

वेदेषु मन्त्राः प्रायशश्छन्दोबद्धा एव । अतो वृत्तज्ञानाय छन्दः शास्त्रमनिवार्यम् । छन्दःशास्त्रविषयको मुख्यो ग्रन्थः पिङ्गलप्रणीतं छन्दःसूत्रमेवोपलभ्यते । प्रातिशाख्यग्रन्थेष्वपि वृत्तविचारः प्राप्यते। एभ्य एव लौकिकछन्दोविषयकाणां ग्रन्थानां विकासः समजनि।

### १.११.४ निरुक्तम्-

निरुच्यते निश्शेषेणोपदिश्यते तत् तदर्थावबोधनाय पदजातं यत्र तन्निरुक्तमिति कथ्यते। निरुक्तस्यास्ति विषयो वैदिकपदानां व्युत्पादनम् । तद् दुरुहपदानामर्थावबोधनाय वैदिकपदव्याख्यानाय विरचितमभूत् । निरुक्ते क्लिष्टवैदिकशब्दानां निर्वचनं प्राप्यते । विषयेऽस्मिन् यास्कप्रणीतं निरुक्तमेव प्रमुखो ग्रन्थः। अत्र मन्त्राणां निर्वचनमूलाया व्याख्यायाः प्रथमः प्रयासः समासाद्यते। वैदिकशब्दानां संग्रहात्मको ग्रन्थो निघण्टुरिति कथ्यते। तस्यैव व्याख्यानभूतं निरुक्तमेतत्। निरुक्ते काण्डत्रयं नैघण्टुककाण्डं नैगमकाण्डं दैवतकाण्डञ्चेति। तदध्ययनात् प्राग्व्याकरणशास्त्रस्य ज्ञानमावश्यकम्। तन्महत्त्वमधिकृत्य दुर्गाचार्यः प्राह– प्रधानं चेदमितरेभ्योऽङ्गेभ्यः सर्वशास्त्रेभ्यश्च अर्थपरिज्ञानाभिनिवेशात्। अर्थो हि प्रधानं तद्गुणः शब्दः स च इतरेषु व्याकरणादिषु चिन्त्यते । यथा शब्दलक्षणपरिज्ञानं सर्वशास्त्रेषु व्याकरणात् एवं

३५ सर्वानुक्रमणी, १.१ ।

३६ सायणः, ऋग्वेदभाष्यभूमिका, पृ. १९।

शब्दार्थनिर्वचनपरिज्ञानं निरुक्तात् । भाषाशास्त्रदृष्ट्या निरुक्तमनुपमं रत्नम् । निरुक्तान्यासन् चतुर्दश । यास्कस्य निरुक्ते द्वादशनिरुक्तकाराणां मतानि निर्दिष्टानि प्राप्यन्ते । साम्प्रतं तु इदं यास्कविरचितं निरुक्तमेव निरुक्ताख्यस्य वेदाङ्गस्य प्रतिनिधित्वं करोति । यास्कः पाणिनेरपि प्राचीनतरः । महाभारते शान्तिपर्वणि यास्को मामृषिरव्यग्रो नैकयज्ञेषु गीतवान् इत्यादि श्लोके निर्दिष्टः संलक्ष्यते । निरुक्तं वस्तुतः स्वयमेव भाष्यं मूलतः परं नितान्तदुरूहत्वात् टीकाकाराः तदर्थावगमनाय कठोरतरं श्रमं कृतवन्तः । तद् वैदिकशब्दकोशनिघण्टुग्रन्थस्य भाष्यम् । निरुक्तस्य पञ्चविधकार्यत्वमधःस्थितेन श्लोकेनोपस्थाप्यते–

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।

धातोस्तदवर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥ इति निरुक्तसंक्षेपः ।

### १.१२.५ ज्योतिषम्-

शुभं मुहूर्तम् आश्रित्यैव विशिष्टोऽध्वरः प्रावर्ततेति शुभमुहूर्ताय ज्योतिषस्योदयोऽभूत् । अत्र सूर्यश्चन्द्रमसोर्ग्रहाणां नक्षत्राणां च गतिर्निरीक्ष्यते परीक्ष्यते विविच्यते च । सौरमासश्चान्द्रमासश्चोभयं परिगण्यतेऽत्र । मखमुहूर्तनिर्धारणे चान्द्रमासस्य प्राधान्यं लक्ष्यते । विषयेऽस्मिन् आचार्यलगधप्रणीतं वेदाङ्गज्योतिषमिति ग्रन्थ एव साम्प्रतमुपलभ्यते । अतीव गूढार्थकोऽयं ग्रन्थः । अद्यावधिं न कोऽप्यस्यार्थावधारणे समर्थः । ज्योतिषस्य महत्त्वं तत्रोच्यते–

वेदा हि यज्ञार्थमभिप्रवृत्ताः, कालानुपूर्वा विहिताश्च यज्ञाः ।

तस्मादिदं कालविधानशास्त्रं, यो ज्योतिषं वेद स वेद वेदम् ॥[३७]

३७ वेदाङ्गज्योतिषम् ।

## १.१३.६ कल्पः-

कल्पसूत्रेषु विविधाध्वराणां संस्करादीनां च वर्णनं प्राप्यते । मन्त्राणां विविधकर्मसु विनियोगश्च तत्र प्रतिपाद्यते। कल्पसूत्राणि चतुर्धा विभज्यन्ते- (अ) श्रौतसूत्रम्, (आ) गृह्यसूत्रम्, (इ) धर्मसूत्रम्, (ई) शुल्वसूत्रं च।

### (अ) श्रौतसूत्रम्-

श्रौतसूत्रेषु श्रुतिप्रतिपादितानां सप्त हविर्यज्ञानां सप्त सोमयज्ञानाम् एवं चतुर्दशयज्ञानां विधिर्विनियोगादिकं च प्रतिपाद्यते । तत्र प्रमुखाणि श्रौतसूत्राणि सन्ति- आश्वलायनश्रौतसूत्रम्, शांखायनश्रौतसूत्रम्, बौधायनश्रौतसूत्रम्, आपस्तम्बश्रौतसूत्रम्, मानवश्रौतसूत्रम्, कात्यायनश्रौतसूत्रम्, लाट्यायनश्रौतसूत्रम्, द्राह्यायणश्रौतसूत्रम्, वैतानश्रौतसूत्रं च । श्रौतसूत्राणीमानि किमप्येकं वेदशाखामाश्रित्य प्रवर्तन्ते।

### (आ) गृह्यसूत्रम्-

गृह्यसूत्रेषु षोडशसंस्काराणां पञ्चमहायज्ञानां सप्तपाकयज्ञानाम् अन्येषां च गृह्यकर्मणां सविशेषं वर्णनं प्राप्यते । गृह्यसूत्राण्यपि कमप्येकं वेदमाश्रित्य वर्तन्ते । तत्र प्रमुखानि सन्ति- आश्वलायनगृह्यसूत्रम्, पारस्करगृह्यसूत्रम्, शांखायनगृह्यसूत्रम्, बौधायनगृह्यसूत्रम्, आपस्तम्बगृह्यसूत्रम्, मानवगृह्यसूत्रम्, हिरण्यकेशीगृह्यसूत्रम्, भारद्वाजगृह्यसूत्रम्, काठकगृह्यसूत्रम्, लौगाक्षिगृह्यसूत्रम्, गोभिलगृह्यसूत्रम्, जैमिनीयगृह्यसूत्रञ्चेति।

### (इ) धर्मसूत्रम्-

धर्मसूत्रेषु मानवानां कर्तव्यं नीतिर्धर्मो रीतयः चतुर्वर्णाश्रमाणां कर्तव्यादिकम्, अन्यच्च सामाजिकनियमादिकं वर्ण्यते। तत्र प्रमुखा ग्रन्थाः सन्ति- बौधायनधर्मसूत्रम्, आपस्तम्बधर्मसूत्रम्, हिरण्यकेशीधर्मसूत्रम्, वशिष्ठधर्मसूत्रम्, मावनधर्मसूत्रम्, गौतमधर्मसूत्रञ्च।

(ई) शुल्वसूत्रम्–

शुल्वसूत्रेषु यज्ञवेद्या मानादिकं वेदिनिर्माणविध्यादिकं च वर्ण्यते । तत्र मुख्या ग्रन्थाः सन्ति– बौधायनशुल्वसूत्रम्, आपस्तम्बशुल्वसूत्रम्, कात्यायनशुल्वसूत्रम्, मानवशुल्वसूत्रञ्च ।

एतेषां सर्वेषामङ्गानां प्रवृत्तिर्वेदसंरक्षणाय सञ्जाता । उपाङ्गानामनुक्रमणीग्रन्थानाञ्च प्रवृत्तिर्वेदसंरक्षणायैव केषाञ्चनग्रन्थानामुपयोगोऽर्थसंरक्षणे चेत्केषाञ्चनग्रन्थानां शब्दसंरक्षणे पुराणन्यायमीमांसानां नैजं वेदप्रतिपादितविविधविषयवर्णने समस्ति । पुराणानां द्वौ विशेषविषयौ परिदृश्येते । प्रथमन्तावत् सृष्टिविषयविवेचनम्, द्वितीयञ्च आख्यानकथनम् । पुराणानां सृष्टिविषयकसिद्धान्तज्ञानाय विविधदर्शनशास्त्रेषु प्रतिपादितानां दार्शनिकसिद्धान्तानां ज्ञानं नितान्तमावश्यकं दरीदृश्यते । पौराणिकानामाख्यानानां रहस्यपरिज्ञानाय तत्तदाख्यानानां मूलस्य वैदिकवाङ्मयस्य ज्ञानमावश्यकं वर्तते । उपाङ्गेषु पुराणवाङ्मयं वेदभाष्यस्थानापन्नमिति महर्षीणां मतम् । अतो वैदिकाख्यानानामाधारेण पौराणिकाख्यानादीनां रहस्योद्घाटनमावश्यकमिति । आस्तिकदर्शनशास्त्राणि चोपाङ्गत्वेन प्रसिद्धानि । तेषु विशेषतः षड्दर्शनानां चर्चा प्राप्यते । तत्र च वेदप्रतिपादितानां लोककल्याणपरकाणां भिन्नभिन्नविषयाणां स्वस्वमतानुसारेण प्रतिपादनं विहितम् । यथा– महर्षिर्व्यासो ब्रह्मज्ञानम्, जैमिनिमुनिर्यागम्, भगवान् पतञ्जलिर्योगम्, महामुनिः कपिलः तत्त्वज्ञानम्, कणादगौतमौ पदार्थवादम्, देवर्षिर्नारदो भक्तिम्, महाराजो मनुश्च धर्ममादाय प्रववृते, यतो हीमे सर्वे विषयाः सन्ति साक्षात् परम्परया वा मोक्षस्य साधकाः । अत एभिर्विभिन्नैराचार्यैः भिन्नभिन्नं विषयमादाय तत्तद्दर्शनानि निर्मितानि । एवं मनुनिपुङ्गवानां गौतम–कणाद–कपिल–पतञ्जलि–व्यास–जैमिनीनां क्रमशः न्यायवैशेषिकसांख्ययोगवेदान्तमीमांसानामधेयानि आस्तिकदर्शनानिपरमप्रसिद्धानि सन्ति–

गौतमस्य कणादस्य कपिलस्य पतञ्जलेः ।
व्यासस्य जैमिनेश्चापि षडेव दर्शनानि च ॥

एषु दर्शनशास्त्रेषु, मुख्यतया मोक्षस्वरूपम्, मोक्षोपायः, आत्मस्वरूपनिरूपणम्, आत्मातिरिक्तस्य समस्तस्य विश्वस्य स्वरूपं तत्साधकानि प्रमाणानि चेत्याद्याध्यात्मविषयः तत्प्रसङ्गे लौकिकविषयोऽपि युक्तिप्रमाणाभ्यां सह विस्तरतश्चर्चितो विद्यते।

तथैवानुक्रमणिकाग्रन्थानामपि दृश्यते महद्वैशिष्ट्यं वेदसंरक्षणे । वैदिकवाङ्मयस्य कर्मकाण्डविधीनां सफलतायै ऋषिच्छन्दो-देवता-विनियोगानां ज्ञानं नितान्तमावश्यकं विद्यते । एतानज्ञात्वा यो यजति अधीते जपति, जुहोति च, न तस्यानुष्ठानं सफलं भवति, न वा पूर्णं फलं जायते । अत एतेषां ज्ञानमत्यावश्यकं प्रोक्तमस्ति अनुक्रमणिकाग्रन्थेषु । पौरस्त्याध्ययनपरम्परायां स्वाध्यायोऽध्येतव्य इत्यादिना सर्वप्रथमं वेदस्याध्ययनं नितान्तमावश्यकमनिवार्यञ्च प्रोक्तमस्ति । वेदविद्याया अध्ययनेन दैवीशक्तेर्विकासान्मानवः सर्वेषु कार्येषु क्षमो जायते । अत एव भगवता मनुना वेदमनधीत्यान्यशास्त्रेषु श्रमशीलाय शूद्रसदृशाय पुरुषाय वेदविहितकर्मणोऽधिकारो निषिद्धः, उक्तञ्च-

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।

स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥

कात्यायनानुक्रमणिकायाम्, ऋषिदैवतच्छंदासि उपक्रमिष्याम इत्येवमुपक्रम्य कथितमस्ति यद् य ऋषिर्देवतादि ज्ञात्वा वेदमन्त्रान् पठति, तस्य वेदः तेजस्वी भवति, यश्चार्थज्ञानपूर्वकं पठति तस्य पठनं महातेजस्वि जायते। एवं मन्त्राणां जपेन हवनेन यज्ञेन वेदपाठेन च सम्पूर्णस्य पाठस्य फलं नूनं जायते— अथ विज्ञायैतानि योऽधीते तस्य वीर्यवदथ योऽर्थवित्तस्य वीर्यवत्तरं भवति । जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यते ।[३८] एभिर्वचनैर्वेदाध्ययने विनियोगस्य परमावश्यक्ता प्रदर्शिताऽस्ति । अतो विनियोगं विना वेदानां पठनं पाठनं वा व्यर्थं तथा पापप्रदं कथितम् । अनुक्रमणिकाग्रन्थैः तत्तद्वेदानां ऋषिच्छन्दोदेवतादीनां विवरणं प्रस्तूय वेदाध्ययनस्य सफलता

---

३८ कात्यायनानुक्रमणिकायाम्, १.१।

प्रतिपादिता । अनुक्रमणिग्रन्थानाम् अनुशीलनेन तत्प्रतिपादितविषयानुसरणेन च वेदाध्ययनं फलवद् भवति । अतो वक्तुं शक्यते यद् अङ्गोपाङ्गानुक्रमणिकादिग्रन्थानां वेदसंरक्षणं परमतात्पर्यमिति।

## १.१३.शुक्लयजुर्वेदीया माध्यन्दिनसंहिता

### १.१३.१. मन्त्राः

मन्त्रप्रकृत्या वेदस्त्रिविधः, ऋग्यजुस्सामभेदात् । ऋग्वेदे पद्यात्मकाः स्तुतिप्रधाना मन्त्राः सन्ति चेद् यजुर्वेदे गद्यात्मका यज्ञसम्पादका यागप्रधाना मन्त्रा विद्यन्ते । तथैव सामवेदे तु गीतिप्रधाना मन्त्राः प्राप्यन्ते । यजुर्वेदस्य प्रतिपाद्यो विषय एव यज्ञप्रतिपादनम् । कश्च यज्ञः ? महर्षिणा कात्यायनेन यज्ञस्य स्वरुपं प्रतिपादितं यत् – द्रव्यं देवता त्यागः[३९]। श्रौतस्मार्तभेदेन द्विप्रकारको यज्ञः देवतोद्देशेन द्रव्यत्यागद्वारा सम्पाद्यत इति । शुक्लयजुर्वेदेऽग्निष्टोम–अश्वमेध–चातुर्मास्य–राजसूयप्रभृतीनां विविधानां श्रौतयागानां प्रतिपादनं विहितमस्ति । यज्ञप्रतिपादकानां तेषां शुक्लयजुर्वेदीयमन्त्राणां भाष्यमपि भाष्यकारैर्याज्ञिकदृष्ट्यैव विहितमस्ति । शुक्लयजुर्वेदस्य माध्यन्दिनसंहितागतेषु मन्त्रेषु प्रतिपाद्यविषयाः संक्षेपेण प्रस्तूयन्तेऽत्र :–

| *क्र.सं.* | *अध्यायाः* | *मन्त्राः* |
|---|---|---|
| १ | १–२ | दर्शपूर्णमासेष्टिमन्त्राः |
| २ | ३ | अग्न्याधानाग्न्युपस्थानचातुर्मास्यादिमन्त्राः |
| ३ | ४–८ | सौमिकमन्त्राः |
| ६ | ९–१० | वाजपेयराजसूययज्ञाङ्गमन्त्राः |

[३९] कात्यायनश्रौतसूत्रम्, १.२.२।

| | | |
|---|---|---|
| ७ | ११-१८ | अग्निचयनमन्त्राः |
| ८ | १९-२१ | सौत्रामणीया मन्त्राः |
| ९ | २२-२९ | आश्वमेधिका मन्त्राः |
| १० | ३० | पुरुषमेधसम्बद्धा मन्त्राः |
| ११ | ३१ | पुरुषसूक्तगतमन्त्राः |
| १२ | ३२-३३ | सर्वमेधसम्बद्धा मन्त्राः |
| १३ | ३४ | ब्रह्मयज्ञगता मन्त्राः |
| १४ | ३५ | पितृमेधसम्बन्धिनो मन्त्राः |
| १५ | ३६-३९ | प्रवर्ग्यसम्बद्धा मन्त्राः |
| १६ | ४० | ईशोपनिषद्गता मन्त्राः |

अस्यैव शुक्लयजुर्वेदस्य प्रथम-द्वितीय-तृतीयाध्यायगतानां केषाञ्चन पारिभाषिकशब्दानां परिशीलनं मयाऽस्मिन् शोधप्रबन्धे विहितमस्ति । परिशीलनसमये शब्दानां प्राकरणिकमर्थं द्योतनाय विविधानां शास्त्राणां वचांस्यपि सङ्गृहीतानि सन्ति । आगामिनि प्रकरणे ते शब्दाः प्रस्तुताः सन्ति ॥

**१.१३.१. भाष्यकाराः**

शुक्लयजुर्वेदीयमाध्यन्दिनशाखाया भाष्यकारत्वेन उव्वटमहीधरौ प्रशस्यौ स्तः । अनयोर्भाष्ययोः आधिक्येन साम्यमनुभूयते । आर्यसमाजस्य प्रवर्तको दयानन्दोऽपि अस्मिन् कार्ये कृतयोगदानो विद्यते । तेषां भाष्यकाराणां संक्षिप्तपरिचयोऽधः प्रस्तूयते :

क) उव्वटः

उव्वटः काश्मीरिको विद्वानिति बहूनां मतम्। एतस्येदं नाम क्वचित् 'औवटः'क्वचिच्च 'उवट' इत्यपि पठ्यते। एतेन यजुर्वेदसंहितायां स्वनाम्ना भाष्यं रचितं यदधुनापि लभ्यते। वज्रटस्य पुत्रोऽयं भोजसमकालिको विद्यते। उव्वटस्य पिता वज्रट आनन्दपुरवास्तव्य आसीत्, उव्वटस्तु अवन्त्यां (उज्जयिन्यां) वसन्नेव भाष्यं निरमादिति ज्ञायते –

ऋष्यादींश्च पुरस्कृत्य अवन्त्यामुवटो वसन्।

आनन्दपुरवास्तव्यवज्रटाख्यस्य सूनुना।

मन्त्रभाष्यमिदं चक्रे भोजे राष्ट्रं प्रशासति॥[४०]

भोजराजस्य काल एकादशशतकं विद्यते। तस्य शासनकालः १०१८ ईशवीतः १०६३ ख्रीष्टीयो विद्यते। अतो भोजराजसमकालिकत्वेनोव्वटः ख्रीष्टीयैकादशशतकस्य पूर्वार्धे बभूवेति निश्चयेन वक्तुं शक्यते।

उव्वटस्यभाष्यं प्रामाणिकं मन्यते। अस्य भाष्येऽनेकमन्त्राणामध्यात्मपरकोऽर्थो दर्शितोऽस्ति। अनेन प्रतीतो भवति यदयं मध्ययुगस्यैकः नितान्तप्रौढवेदज्ञ आसीदिति।

ख) महीधरः

आचार्यमहीधरस्य जन्म काशीनगरेऽभूत्। अयं नागरब्राह्मणवंशीयो विद्वानासीत्। काश्यामेवाधीतशास्त्रो लब्धविद्वज्जनप्रतिष्ठोऽयं वैष्णवाचार्यस्तन्त्ररहस्यज्ञो वैदिकसाहित्यपारङ्गमश्चासीत्। विलक्षणप्रतिभावानयं प्रभाववान् विद्वाँश्चासीत्।

---

[४०] वैदिकवाङ्मयस्येतिहासः, पृ. ३६।

महीधरेण वेददीपस्य सामभाष्यम् विरचितमस्ति । अस्य भाष्यस्योपरि उव्वटभाष्यस्य स्पष्टच्छाया प्रतिलक्षिताऽस्तीति मन्यते। १६४५ वैक्रमाब्देऽनेन तन्त्ररहस्यविवेचको 'मन्त्रमहोदधिः' नामा एक ग्रन्थः प्रणीतः, उक्तमपि यत् –

अब्दे विक्रमतो जाते बाणवेदनृपैर्मिते।

ज्येष्ठाष्टम्यां शिवस्याग्रे पूर्णो मन्त्रमहोदधिः ॥[४१]

अतोऽस्य भाष्यकारस्य समयः षोडशशतकस्योत्तरार्द्धमिति निश्चीयते।

महीधरेण यजुर्वेदसंहितायां स्वनाम्ना भाष्यं रचितं यदधुनापि लभ्यते । अस्य भाष्यं प्रामाणिकं मन्यते । सरला भाषाशैली भाष्यकारस्यास्य वैशिष्ट्यं विद्यते । वैदिकसाहित्येऽस्य भाष्यमतीव महत्त्वाधायकं प्रतिभाति।

**ग) दयानन्दः**

महर्षेर्दयानन्दस्य जन्म १८२४ ईशवीयेऽभूत्। गूर्जरप्रदेशे लब्धजन्माऽयं ब्राह्मण आसीत्। तस्य बाल्यकालिकं नाम मूलशङ्करोऽस्ति। वेदस्योपनिषदश्च समुपासकोऽयं समाजसुधारकत्वेन समादृतो विद्यते।

महर्षिणा दयानन्देन १८७४ ईशवीये आर्यसमाजाख्याया संस्थायाः स्थापना विहिता । अस्या एव संस्थाया माध्यमेन दयानन्दो वैदिकपरम्परायाः स्थापनां विधातुं प्रयतितवान् । विलक्षणप्रतिभासम्पन्नोऽयं मूर्तिपूजाया वैयर्थ्यं स्वीकरोति । भगवान् निराकारो विद्यते, अतो मूर्तिपूजाया प्रयोजनं नास्तीति तस्य सिद्धान्तः । अनेन वेदानां भाष्यं विहितम् । अस्य भाष्ये

---

[४१] पूर्ववत्, पृ. ३८।

परम्परात आगतोऽर्थ एव न, आधुनिकविज्ञानसापेक्षोऽर्थश्च समुलभ्यते । विद्वानयं रुद्र्यर्थं नैव स्वीकरोतीति ज्ञायते। लब्धप्रतिष्ठोऽयं १८८३ ईशवीये दिवङ्गतः।

## २.१४ पारिभाषिकशब्दाः

परिभाषा विद्यते यस्य स पारिभाषिकः । परिभाषा नाम लक्षणम् । शब्दार्थदृष्ट्या शब्दो द्विविधः – सामान्यशब्दः, पारिभाषिकशब्दश्च । कस्मिँश्चिद् क्षेत्रविशेषे यो शब्दो निश्चितार्थं द्योतयति स पारिभाषिकः । यश्च निश्चितार्थे नैव प्रयुज्यते स सामान्यः । पारिभाषिकशब्दः सीमाबद्धो भवति, स विशिष्टार्थं सङ्केतयति, सामान्यव्यवहारे नैव तस्य प्रयोगः।

शोधप्रबन्धेऽस्मिन्नपि तादृशा शब्दा एव पारिभाषिकशब्दत्वेन गृहीताः सन्ति, येऽमरकोषादिषु निहितं लौकिकमर्थं नैव बोधयन्ति, येच सामान्यार्थं न प्राकरणिकं विशिष्टमर्थं द्योतयन्ति । शुक्लयजुर्वेदीयमाध्यन्दिनशाखायाः प्रथमाध्यायादारभ्य तृतीयाध्यायपर्यन्तं संहितागतानां कतिपयानां पारिभाषिकशब्दानामर्थविश्लेषणपूर्वकं परिशीलनात्मकमध्ययनं विहितमत्र । परिशीलनक्रमे उव्वटमहीधरदयानन्दानां भाष्यकाराणां भाष्यत्रयमाधृत्य अध्ययनं विहितमस्ति।

## *।। इति द्वितीयोऽध्यायः ।।*

# तृतीयोऽध्यायः

## दर्शपौर्णमासेष्टिगतानां पारिभाषिकशब्दानां परिशीलनात्मकः

प्राच्यवाङ्मयेषु वेदस्य सर्वशास्त्राधारकत्वं चरमं प्रामाण्यञ्च तदनुयायिभिर्दार्शनिकैरैकमत्येन उरीकृतम् । दर्शनेषु षड्दर्शनानि प्रसिद्धानि । तत्र सर्वत्र नैजं वैषयिकं ज्ञानं सहजतया व्याकर्तुं तत्तच्छास्त्रप्रसिद्धं पारिभाषिकशब्दस्वरूपं विवृतम् । तेषां पारिभाषिकशब्दानां बोधं विहाय नहि तत्र प्रवेशः । ये च शब्दाः तत्तच्छास्त्रेषु सामान्यार्थं न, विशिष्टमर्थं द्योतयन्ति, ते पारिभाषिकशब्दरूपेण प्रसिद्धाः । पारिभाषिकशब्दज्ञानसाहाय्येन प्राच्यवाङ्मयेषु पाश्चात्त्यवाङ्मयेषु च गतिर्भवति । परिभाषामापन्नस्य शब्दस्यार्थबोधनेन साहित्यसङ्गीतकलासु सुरुचिरुत्पद्यते । वेदस्य संहितायां, ब्राह्मणभागे, श्रौतसूत्रे च विविधाः पारिभाषिकशब्दाः प्रयुक्ता दृश्यन्ते । एतेषामनुशीलनं विना वैदिकं ज्ञानमसम्भवं भवति ।

शुक्लयजुर्वेदीयमाध्यन्दिनशाखायाः प्रथमेऽध्याये ३१, द्वितीये च ३४ संख्याका मन्त्राः सन्ति । तत्र द्वितीयाध्यायस्यान्तिमान् षण्मन्त्रान् विहाय तदितरेषु मन्त्रेषु दर्शपौर्णमासेष्टिर्निरुपिता विद्यते । शोधप्रबन्धस्याध्यायेऽस्मिन् तेषामेव दर्शपौर्णमासेष्टिमन्त्रगतानां कतिपयानां पारिभाषिकशब्दानामर्थविश्लेषणपूर्वकं परिशीलनात्मकमध्ययनं विहितमस्ति । परिशीलनक्रमे उव्वटमहीधरदयानन्दानां भाष्यकाराणां भाष्यत्रयमाधृत्य अध्ययनं विहितम् ।

### ३.१ इट्

**शब्दसन्दर्भः –**

इषेत्वोर्ज्जेत्वा............... । (शु.वेदः १/१)

मन्त्रभागोऽयं शाखाच्छेदने विनियुक्तः । हे शाखे ! इषे वृष्ट्यै त्वां छिनद्मि ।

इष्यते काङ्क्ष्यते सर्वैर्व्रीह्यादिधान्यनिष्पत्तये सा इट्। श्रुत्या वृष्टिर्व्याख्याता। वृष्ट्यै तदाह यदाहेषे त्वा इति श्रुतिः।[४२]

शब्दविमर्शः –

इच्छतीति इट् इति व्युत्पादयन् शब्दकोषकारः आप्टेमहाभागः शब्दमिमं 'इषु इच्छायाम्' इत्यस्माद्धातोः सिद्ध्यति । निरुक्तकारोऽपि शब्दस्यास्यार्थम् इच्छाविषयीभूतान्नलक्षणमिति विदधाति। अनेन ज्ञायते यत् – इडिति अन्नम्। परमित्यत्र इट्शब्दस्यार्थो वृष्टिर्विहितोऽस्ति।

### ३.२ श्रेष्ठतमं कर्म

शब्दसन्दर्भः –

इषेत्वोर्ज्जेत्वा......... श्रेष्ठतमाय कर्मणे .........। (शु.वेदः १/१)

मन्त्रभागोऽयं गोप्रार्थने विनियुक्तः । हे गावः ! श्रेष्ठतमाय कर्मणे यज्ञाय वनं प्रति गच्छन्तु । यज्ञार्थमित्यर्थः । यज्ञो वै श्रेष्ठतमं कर्म इति श्रुतिः ।[४३] साक्षात्स्वर्गसाधनत्वादितरकर्मभ्यः श्रेष्ठतमत्वम्।

शब्दविमर्शः –

अतिशयेन प्रशस्तं श्रेष्ठतमम् । कर्म चतुर्विधं भवति – अप्रशस्तम्, प्रशस्तम्, श्रेष्ठम्, श्रेष्ठतमञ्चेति। लोकविरुद्धं वधबन्धचौर्यादिकमप्रशस्तम्। लोकःश्लाघनीयं बन्धुवर्गपोषणादिकं प्रशस्तम्। स्मृत्युक्तं वापीकूपतडागादिकं श्रेष्ठम्। वेदोक्तं यज्ञरूपं श्रेष्ठतममिति महीधरः।[४४]

---

[४२] शतपथब्राह्मणम् १.७.१.२।

[४३] पूर्ववत् १.७.१.५।

## ३.३ अघ्न्या

**शब्दसन्दर्भः –**

इषेत्वोर्ज्जेत्वा......... आप्यायध्वमघ्न्या .........। (शु.वेदः १/१)

मन्त्रभागोऽयं गोप्रार्थने विनियुक्तः । अघ्न्याशब्देन गाव उच्यन्ते । हे अघ्न्याः गावः ! यूयमाप्यायध्वम्।

गोवधस्योपपातकरूपत्वाद्धन्तुमयोग्या अघ्न्या उच्यन्ते।

**शब्दविमर्शः –**

हन्तुमयोग्या अघ्न्या। अघे नञि वोपपदे हिंसार्थकाद् हन्धातोः 'अघ्न्यादयश्च' इति सूत्रेण यक्प्रत्ययान्तो निपातः । अघ्न्या अहन्तव्या भवति, अघघ्नीति वा, अघस्य पापस्य दुर्भिक्षादेर्वा हन्त्रीति ।[४५]अघ्न्याशब्देन गाव उच्यन्ते – 'अघ्न्या' इति गोनामसु पठितम्[४६]। पौरस्त्यजगति गावो हन्तुमयोग्या मन्यन्ते। अमरकोषकारश्च शब्दस्यास्यार्थं गौरिति विदधाति – अर्जुन्यघ्न्या रोहिणी स्यादुत्तमा गोषु नैचिकी ।[४७] महर्षिर्दयानन्दस्तु शब्दस्यास्यार्थमनेकधा विहितवान् – वर्धयितुमर्हा हन्तुमनर्हा गाव इन्द्रियाणि पृथिव्यादयः पशवश्चेति[४८]।

---

[४४] शुक्लयजुर्वेदसंहिता, १.१।

[४५] निरुक्तम् ११.४३।

[४६] निघण्टुः, २.११।

[४७] अमरकोषः १८४०।

[४८] यजुर्वेदभाष्यम्, १.१।

### ३.४ गोपतिः

शब्दसन्दर्भः –

इषेत्वोर्ज्जेत्वा……… अस्मिन्गोपतौ ………। (शु.वेदः १/१)

अयं मन्त्रभागः गोप्रार्थने विनियुक्तः। हे गावः ! यूयम् अस्मिन् गोपतौ यजमाने ध्रुवाः बह्वीः स्यात।

शब्दविमर्शः –

गोपतिशब्दस्य सन्ति बहवोऽर्थाः। गवां पतिः गोपतिरिति व्युत्पत्त्या गोस्वामिनो ज्ञानं भवति। गोर्वृषभस्य पतिः गोपतिरिति साण्डवृषभोऽवबुध्यते – आर्षभ्यः षण्डतायोग्यः षण्डो गोपतिरिट्चरः इति।[४९]गां पृथ्वीं पाति पालयतीति गोपतिरिति व्युत्पत्त्या भूपतेर्नृपस्य, भगवतो विष्णोर्वा ज्ञानं भवति। तथैव शब्देनानेन सूर्यस्यापि बोधो भवति– मार्तण्डो गोपतिः श्रीमान् कृतज्ञश्च प्रतापवान् इति।

अनेन प्रकारेण शब्दस्यास्यानेके व्युत्पत्तयो विहिताः सन्ति, परमित्यत्र शब्दस्यास्यार्थो गवां स्वामी यजमानो विहितोऽस्ति।

### ३.५ वसुः

शब्दसन्दर्भः –

व्वसोः पवित्रमसि…………। (शु.वेदः १/२–३)

अयं मन्त्रभागः पवित्रकरणे विनियुक्तः। वसुशब्देन यज्ञस्य बोधो भवति।

---

[४९] अमरकोषः १८३१।

वासयति वृष्ट्यादिद्वारा स्थापयति विश्वमिति वसुर्यज्ञः। यज्ञशब्देन तदीयहविर्द्रव्यरूपं क्षीरं लक्ष्यते। यज्ञो वै वसुः इति श्रुतिः।[५०]

शब्दविमर्शः -

'वस आच्छादने' इत्यस्माद्धातोरुप्रत्ययेन शब्दस्यास्य सिद्धिर्जायते। निरुक्तकारो निर्वक्ति यत् - वसवो यद्विवसते सर्वमिति।[५१] वसुशब्दोऽनेकार्थकः। शब्दस्यास्यगणदेवता, धनम्, बकपुष्पम् इत्यादयो बहवोऽर्थाः सन्ति। अमरकोषकारः प्रतिपादयति यत् - देवभेदेऽनले रश्मौ वसू रत्ने धने वसुः इति।

मन्त्रभागेऽस्मिन् शब्दस्यास्यार्थः यज्ञो विहितः।

## ३.६ पवित्रम्

शब्दसन्दर्भः -

व्वसोः पवित्रमसि.........। (शु.वेदः १/२-३), पवित्रेस्थो वैष्णव्यौ.......। (शु.वेदः १/१२)

द्वौ कुशौ कुशत्रयं वा पवित्रमुच्यते।

शब्दविमर्शः -

पूयते आज्यादिरनेन इति व्युत्पत्तौ पूञ्-पवने इत्यस्माद्धातोः करणेऽर्थे इत्र-प्रत्ययेन पवित्रशब्दो निष्पद्यते। यज्ञमधुसूदन्यां पवित्रशब्दः अनया रीत्याऽर्थ्यते— पवित्रं त्वनखच्छिन्नं

---

[५०] शतपथब्राह्मणम् १.७.१.९।

[५१] निरुक्तम् १२.४१।

साग्रं प्रादेशमात्रं द्विदलं समपरिणाहं मन्त्रसंस्कारयुक्तं दर्भद्वयम् । तेन प्रोक्षणादिप्रयोगाः क्रियन्ते,तस्मात् पवित्रम् ।[५२] द्वौ कुशौ कुशत्रयं वा पवित्रमुच्यते ।[५३] पारस्करगृह्यसूत्रे आचार्यो हरिहरः पवित्रे कृत्वा इत्यस्यार्थः प्रथमं त्रिभिः कुशतरुणैरग्रतः प्रादेशमात्रं विहाय द्वे कुशतरुणे प्रच्छिद्य इति चकार । सन्ति पवित्रशब्दस्य नैकविधा अर्थाः यथा– मन्त्ररश्म्यापोऽग्निवायुसोमसूर्येन्द्राः ।[५४] येन देवाः पवित्रेण .....इति मन्त्रवाचकः, पवित्रवन्तः परि वाचमासते ..... इति रश्मिवाचकः, शतपवित्राः स्वधया मदन्तीः.......इत्यपां वाचकः,अग्निः पवित्रं स मा पुनातु वायुः सोमः सूर्य इन्द्रः पवित्रन्ते मा पुनन्तु[५५] इति अग्न्यादीनां वाचकः । दयानन्दश्च शब्दोऽयं पवित्रकारकत्वेन स्वीकृतः – पुनाति येन कर्मणा तत् पवित्रम्[५६]इति । वस्तुतोऽत्र प्राकरणिकमर्थं शतपथब्राह्मणं प्रस्तौति, यथा– पवित्रं व्वै दर्भाः[५७]। दर्भ एव पवित्रशब्दस्य प्राकरणिकोऽर्थः । अत एव स्मर्यते–

अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्॥

**३.७ घर्मः**

**शब्दसन्दर्भः –**

क) व्वसोः पवित्रमसि.......घर्मोऽसि....। (शु.वेदः १/२)

---

५२यज्ञमधुसूदनी, पृ.३३। श्रौतपदार्थनिर्वचनम्, पृ.९।

५३ शुक्लयजुर्वेदसंहिता १.२। (महीधरभाष्ये)

५४ कात्यायनश्रौतसूत्रम् ४.२.१५।

५५ निरुक्तम् ४.२।

५६यजुर्वेदभाष्यम्, १.२।

५७शतपथब्राह्मणम्, ३.१.३.१८। तैत्तिरीयब्राह्मणम् ३.१.३.१८,१.३.७.१।

घृ क्षरणदीप्त्योः। जिघर्त्तीति घर्मः दीपकः। अन्तरिक्षलोकः। घर्म इति यज्ञनामसु पठितम् ।[५८]

ख) जनयत्त्यैत्वा.......घर्मोऽसि.....। (शु.वेदः १/२२)

अयं मन्त्रभागः पुरोडाशाधिश्रयणे विनियुक्तः। हविषः पुरोडाशस्य वैशिष्ट्यं जनयति अयं शब्दः। हे पुरोडाश ! त्वं घर्मोऽसि। घर्मशब्देन दीप्यमानः प्रवर्ग्य उच्यते। श्रप्यमाणतया दीप्यमानत्वात् प्रवर्ग्यः।

शब्दविमर्शः -

घरति अङ्गाद् इति व्युत्पादयन् शब्दकोशकारः आप्टेमहाभागः शब्दस्यास्य सिद्धिप्रक्रियां 'घृ क्षरणदीप्त्योः' इत्यस्माद्धातोर्मक्निपातनात् भवतीति निरूप्य तापनार्थं प्रतिपादयति । तथैव अमरकोषकारः घर्मशब्दस्यार्थं प्रस्वेदहेतोस्तापं विदधाति - घर्मो निदाघः स्वेदः स्यात् इति ।[५९] निरुक्तकारस्तु प्रवर्ग्याख्यकर्मोपयुक्तं महावीरपात्रं घर्मशब्देन बोधयति।

यज्ञप्रसङ्गः -

घर्मशब्दः पुरोडाशस्य हविषः वैशिष्ट्यं जनयति। कश्च पुरोडाशः ? पुरः देवातानामग्रे दास्यते दीयते असाविति पुरोडाशः । देवानां पुरतो दीयमानं हविः पुरोडाशः इत्यर्थः । यवचूर्णनिर्मितो ब्रीहिचूर्णनिर्मितो वा कपालेषु संस्कृतः रोटिकाविशेषः पुरोडाशः । पुरोडाशः कूर्मसदृशः अश्वशफवत् विस्तृतः इति आपस्तम्बः आह— अतुङ्गमनपूपाकृतिं कूर्मस्येव प्रतिकृतिमश्वशफमात्रं करोति यावन्तं वा मन्यन्ते ।[६०] दृश्यते चान्यत्र— ब्रीह्यादिपिष्टैः

---

५८ निघण्टुः ३.१७।

५९ अमरकोषः ४२८।

६० आपस्तम्बश्रौतसूत्रम्, १.२५.४.५।

श्रृतैर्मन्त्रादियोगात् विधिवत् सम्पादितं कपालोपहितं द्रव्यं पुरोडाशः ।[६१] ब्रीहिपिष्टैर्यवपिष्टैर्वा निर्मितः पक्वः पिण्डविशेषः पुरोडाश इत्युच्यते । मीमांसाकोषे तु— पुरोडाशः तप्तेषु कपालेषु अधः पाकार्थमधिश्रीयते उपरि च अङ्गारा अभ्युह्यन्ते इति परिभाषा निर्दिष्टा ।[६२] ऐतरेयब्राह्मणे दृश्यते यत् – देवैः सोमाहुतिं प्राक् पुरोडाशकर्तनात् तेषां नाम पुरोडाश इति । पुरो वा एतान् देवान् अक्रत यत्पुरोडाशास्तत्पुरोडाशानां पुरोडाशत्वम् ।[६३] शतपथब्राह्मणानुसारेण येन पुरोडाशेन मनुष्याणां कृते यज्ञः रुचिकरः सञ्जातः स च पुरोडाशः मनुष्यैः पुरः स्थापितः अतः अस्य नाम पुरोडाश इति— स वा एभ्यस्तत् पुरोऽदाशयत्, य एभ्यो यज्ञं प्रारोचयत्, तस्मात् पुरोदाशः, पुरोदाशो ह वै नामैतद्यत् पुरोडाश, स एष उभयत्राच्युत आग्नेयोऽष्टाकपालः पुरोडाशो भवति इति ।[६४] वस्तुतः पुरोडाशो यज्ञस्य शिरोभागः— शिरो ह वा एतद्यज्ञस्य यत् पुरोडाशः ।[६५] अतः देवतोद्देशेन नामग्रहणपूर्वकं गृहीतः तण्डुलपिष्टैः यवपिष्टैर्वा निर्मितः संस्कृतकपालोपरि गार्हपत्याग्नौ यथाविधि पक्वः रोटिकाविशेष पुरोडाश इति । पुरोडाशः श्रप्यमाणतया दीप्यमानत्वात् प्रवर्ग्यः ।

### ३.८ सोमः

**शब्दसन्दर्भः –**

साविश्वायुः ............... सोमेनातनच्मि .......... । (शु.वेदः १/४)

---

६१ यज्ञमधुसूदनी, पृ. ३७ ।

६२ मीमांसाकोषः, पृ. २५८४ ।

६३ ऐतरेयब्राह्मणम्, २.२३ ।

६४ शतपथब्राह्मणम्, १.६.२.५ ।

६५ पूर्ववत्, १.२.१.२ ।

मन्त्रभागोऽयं क्षीराऽऽतञ्चने विनियुक्तः। हे क्षीर ! त्वां सोमेन सोमवल्लीरसेन आतनच्मि दध्यर्थं कठिनीकरोमि।

यद्यप्यत्राऽऽतञ्चनहेतुर्दधिशेषस्तत्रापि भावनया तस्यैव सोमत्वं सम्पाद्यते।

**शब्दविमर्शः –**

शब्दकोशकारेणाऽऽप्टेमहाभागेन स्वकीये ग्रन्थे सोमशब्दस्यार्था बहवो विहिताः सन्ति। सोमरसः, अमृतम्, चन्द्रमा, जलमित्यादयो विद्यन्ते तस्यार्थाः । अमरकोषकारस्तु सोमशब्दश्चन्द्रमावाचकत्वेनैव निरूपयति स्वकीये ग्रन्थे – अब्जो जैवातृकः सोमो ग्लौर्मृगांकः कलानिधिः इति।[६६] महर्षिर्दयानन्दः शिल्पविद्यया सम्पादितो रसः[६७] सोमशब्देन गृहीतवान्। निरुक्तकारो यास्कः सोमरसवाचकत्वेन शब्दस्यास्यार्थं विदधाति । 'षुञ् अभिषवे' इत्यस्माद्धातोर्मन्प्रत्ययेन सोमशब्दस्य सिद्धिप्रक्रियां प्रदर्शयन् निरुक्तकारो व्युत्पादयति यत् – सूयतेऽभिषूयते ह्यसौ यज्ञे । सोमो नूनमेष तद्देवानामन्नम् । ओषधिः सोमः । सुनोतेर्यदेनमभिषुण्वन्ति इति।[६८] मन्त्रभागेऽस्मिन् प्रयुक्तः सोमशब्दः सोमरसवाचकः।

### ३.९ अग्निः

**शब्दसन्दर्भः –**

अग्ने व्रतपते.......................। (शु.वेदः १/५)

मन्त्रभागोऽयं व्रतग्रहणे विनियुक्तः।

---

[६६] अमरकोषः १७३।

[६७] यजुर्वेदभाष्यम्, १.४।

[६८] निरुक्तम् ११.१.२।

होतृत्वं दूतत्वञ्चाग्नेः कर्म। उभयं वा एतदग्निर्देवानां होता च दूतश्चेति श्रुतिः ।[६९]

शब्दविमर्शः

अङ्गति ऊर्ध्वं गच्छतीत्यग्निः । 'अगि गतौ' इत्यस्माद् धातोः निप्रत्ययेन निष्पन्नोऽग्निशब्दः तापपाकप्रकाशगुणविशिष्टं ज्वालायुक्तं वह्निं बोधयति ।[७०] अङ्गति स्वर्गं गच्छति हविर्नीत्वा इति अग्निः । हलायुधकोशानुसारेण हविःप्रक्षेपणाधारभूतेषु गार्हपत्याहवनीयदक्षिणाग्निसभ्यावसत्थ्यौपासनकुण्डेषु य ज्वालामयं शरीरं धत्ते स एव अग्निरिति ।[७१] निरुक्तकारस्तु अग्निशब्दं 'इण् गतौ', 'अनक्ति/दहति वा', 'णीञ् प्रापणे' इत्येतेभ्यस्त्रिभ्यो धातुभ्यो निष्पादयति। त्रिभ्य आख्यातेभ्यो जायते - इतात्, अक्तात् दग्धाद्वा, नीतात् इति। आचार्यो यास्कः अग्नेर्महत्त्वं ख्यापयन् आह – (अग्निः कस्मात्) अग्रणीर्भवति, अग्रं यज्ञेषु प्रणीयते, अङ्गं नयति सन्नममानः । सर्वेष्वर्थेषु अयमात्मानमग्रं नयति, कर्मफलं वाऽग्रे नयति इति अग्निः, असौ अग्रणीर्मुख्यो भवति।[७२] असौ प्रथमं यथा स्यात् तथा यज्ञेषु कर्तव्येषु प्रणीयते अतः अग्निरित्युच्यते। दयानन्दस्तु सत्योपदेशकत्वेनाग्निशब्दस्य ग्रहणं विहितवान्।[७३]

यज्ञप्रसङ्गः

अङ्गयन्ति अग्र्यं जन्म प्रापयन्ति इति व्युत्पत्याऽपि अग्निशब्दो निष्पद्यते। शतपथश्रुतौ अस्य व्युत्पत्तेराधारः प्राप्यते यथा— अग्निहोत्रहोमं कुर्वन् यजमानः देहावसानेऽग्नौ प्रक्षिप्तः

---

[६९]शतपथब्राह्मणम् १.४.५.४।

[७०] संस्कृत-हिन्दी-कोशः, पृ. ६।

७१ हलायुधकोशः, पृ. १०७।

७२ निरुक्तम्,७.४.१४।

[७३] यजुर्वेदभाष्यम्, १.५।

मातापितृशरीरादिवत् तस्मादग्नेः सकाशात् दिव्यशरीरोऽभिनवः उत्पद्यते। यत्रैनमग्नावभ्यादधति तदेषोऽग्नेरधिजायते । अथास्य शरीरमेवाग्निर्दहति तद् यथा पितुर्वा मातुर्वा जायते, एवमेषोऽग्नेरधिजायते । यथा सरलावृत्तौ – चयनयागे अग्निशब्देन इष्टकाभिः सम्पादितमग्न्याधारभूतं स्थण्डिलमुच्यते।[७४]

अयमग्निः लौकिके वैदिके वार्थे साधनत्वेन आत्मानं प्रधानीकृत्य सर्वमन्यदङ्गमात्मनोऽगतां नयतीति अङ्गनीः सन् अग्निः उच्यते।

त्रयोऽग्नयः सन्ति – आमात्, क्रव्यात्, देवयाडिति । आममपक्वमत्तीत्यामात् लौकिकोऽग्निः। शवदाहे क्रव्यं मांसमत्तीति क्रव्यात् चिताग्निः। देवा इज्यन्ते यस्मिन्नसौ देवयाद् यज्ञाग्निरिति।[७५]

### ३.१० व्रतपतिः

**शब्दसन्दर्भः –**

अग्ने व्रतपते......................। (शु.वेदः१/५)

मन्त्रभागोऽयं व्रतग्रहणे विनियुक्तः। अग्नेर्विशेषणमिदं पदम्। व्रतस्य अनुष्ठेयकर्मणः पतिः पालकः व्रतपतिः अग्निः। अग्निर्वै देवानां व्रतपतिरिति।[७६]

---

७४ कात्यायनश्रौतसूत्रम्, ४.१।

७५ शुक्लयजुर्वेदसंहिता १.१७।

७६ शतपथब्राह्मणम्१.१.१.२।

शब्दविमर्शः

'वृञ् वरणे' इत्यस्माद्धातोरतच्प्रत्ययेन व्रतशब्दो निष्पद्यते। व्रतस्य पतिर्व्रतपतिरग्निः। अत्र व्रतमिति किम् ? इति जिज्ञासासमुत्पद्यते। अमरकोषकारः प्रतिपादयति यत् – नियमो व्रतमस्त्री तच्चोपवासादिपुण्यकम्[७७] इति। यत्कर्म कर्तव्यं यन्नैव कर्तव्यमिति व्रतम्। व्रतं स्वाधिकारयुक्तं कर्म[७८]इत्युदीर्य निरुक्तकारो निरुपयति यत् – व्रतमिति कर्मनाम वृणोतीति सतः[७९] इति। महर्षिर्दयानन्दः सत्यभाषणं, सत्यकरणं, सत्यमानञ्चेति व्रतत्वेन स्वीकरोति। तत्सत्यभाषणादीनां पतिरेव व्रतपतिः।[८०]

## ३.११ रक्षः

शब्दसन्दर्भः –

प्रत्युष्टꣳरक्षः....................। (शु.वेदः १/७)

मन्त्रभागोऽयं शूर्पाग्निहोत्रहवणीप्रतपने विनियुक्तः।

सामान्यतः रक्षःशब्देन राक्षसजातेर्बोधो भवति। अस्मिन् मन्त्रे यज्ञविघातकत्वेन शब्दस्यास्यार्थो विहितोऽस्ति। तृणादिकमेव रक्ष उच्यत इत्यत्र।

---

[७७] अमरकोषः, १४२७।

[७८] निरुक्तम्, १२.३.३२।

[७९] निरुक्तम्, २.४.१३।

[८०]यजुर्वेदभाष्यम्, १.५।

शब्दविमर्शः

रक्षधातोरसुन्प्रत्ययेन निर्मितस्य रक्षःशब्दस्य 'रक्ष्यते हविरस्मादिति' व्युत्पत्तिं विधाय शब्दकोशकारः आप्टेमहाभागः अस्यार्थं भूतप्रेतादिकं विदधाति ।[८१] तथैव अमरकोषकारश्च राक्षसजातेर्बोधनं करोति – यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी इति[८२]। निरुक्तकारस्तु त्रिभ्यो धातुभ्यः शब्दमिमं सिद्धयति– रक्षो रक्षितव्यमस्माद्रहसि क्षणोतीति वा रात्रौ नक्षत इति वा।[८३]

क) पालनार्थकात् रक्षधातोर्निर्मितस्य रक्षःशब्दस्य व्युत्पत्तिं रक्षितव्यं शरीरमस्मादिति रक्षः । रक्षो हि मानुषान् भक्षयतीति।

ख) क्षणु हिंसायाम् इत्यस्माद्धातोः संसिद्धस्य रक्षःशब्दस्य व्युत्पत्तिं रहसि विविक्ते प्रदेशे क्षणोति हिनस्तीति रक्षः ।

ग) णक्ष गतौ इत्यस्माद्धातोर्निष्पन्नस्य रक्षःशब्दस्य व्युत्पत्तिं रात्रौ नक्षते गच्छतीति रक्षः ।

अनेन प्रकारेण सामान्यतः रक्षःशब्देन राक्षसजातेर्बोधो भवति, परमित्यत्र यज्ञस्य विघातकत्वेन तृणादिकमपि रक्ष उच्यते । यज्ञविघातकाः सर्व एव रक्षःशब्देन सम्बुध्यन्त इति भावः।

## ३.१३ अरातिः

शब्दसन्दर्भः –

प्रत्युष्टꣳरक्षः......... अरातयो............। (शु.वेदः १/७)

---

[८१] संस्कृत–हिन्दी–कोशः, पृ. ८४२।

[८२] अमरकोषः, १२०।

[८३] निरुक्तम् ४.३.१८।

मन्त्रभागोऽयं शूर्पाग्निहोत्रहवणीप्रतपने विनियुक्तः। न विद्यते रातिर्दानं यस्य स अरातिः।

**शब्दविमर्शः**

'रा दाने' इत्यस्माद्धातोः क्तिन्प्रत्यये विहिते सति रातिशब्दस्य निष्पत्तिः, नञ्तत्पुरुषेऽरातिः। शब्दकोशकारस्य आप्टेमहाभागस्य अमरकोषकारस्य च मते अरातिशब्दः शत्रुवाची– अभिधातिपरारातिप्रत्यर्थिपरिपन्थिनः।[८४] निरुक्तकारश्च दानकर्मरहितत्वेन दानबुद्धिरहितत्वेन वाऽरातिशब्दं निर्वक्ति– याश्च नो दूरे तडितो याश्च अन्तिकेऽरातयोऽदानकर्माणोऽदानप्रज्ञा वा।[८५]

अविद्यमाना रातिर्दानं यस्मिन् स अरातिः। याज्ञिकसन्दर्भे शब्दोऽयं यज्ञविघातकः शत्रुवाचकः। अग्निहोत्रहवणीशूर्पयोः प्रतपनेनात्र स्थिता अरातयो दग्धा भवन्तीति भावः।

**३.१३ धूः**

**शब्दसन्दर्भः** -

धूरसि धुर्व..................। (शु.वेदः १/८)

मन्त्रभागोऽयं धूरभिमर्शने विनियुक्तः। वह्नेर्विशेषणमिदं पदम्। हे वह्ने ! त्वं धूरसि हिंसकोऽसि।

अग्निर्वा एष धुर्यस्तमेतदत्येष्यन्भवति इति।[८६]

---

[८४] अमरकोषः १४९०।

[८५] निरुक्तम् ३.२.११, पृ. १२६।

[८६] शतपथब्राह्मणम् १.१.२.१०,

**शब्दविमर्शः**

धूशब्दो हिंसार्थकाद् धुर्वीधातोः सिद्ध्यति । **धूर्धूर्वतेर्वधकर्मणः । धुर्वीधातोः कर्तरि क्विप्प्रत्यये, वलोपो दीर्घश्च धूरिति । धूर्वन्ति घ्नन्ति उपक्षयन्ति कर्माण्याभिरिति धुरः, हिंसन्ति परानाभिरिति वा ।**[८७] धूःशब्देनानुडुत्स्कन्धयोरुपरि यौ निधीयेते तौ युगस्य प्रान्तौ युग्मशम्यान्तरालौ उच्येते ।[८८] व्रीहिरूपहविर्धारकशकटसम्बन्धिनो युगस्य बलीवर्दवहनप्रदेशे कश्चिद्धिंसकोऽग्निः शास्त्रदृष्टो विद्यते। स एवाग्निः प्रार्थ्यते मन्त्रेऽस्मिन्।

**३.१४ स्वः**

**शब्दसन्दर्भः –**

**भूतायत्वा नारातये.................. स्वरभिविख्येषं.....................। (शु.वेदः १/११)**

**मन्त्रभागोऽयं प्राङीक्षणे विनियुक्तः। अहं स्वः यज्ञं अभिविख्येषं पश्येयमिति। यज्ञो वै स्वरहर्देवाः सूर्यः इति श्रुतिः ।**[८९]**यज्ञदिवसदेवसूर्याः स्वःशब्देनोच्यन्ते । स्वर्गहेतुत्वात् स्वःशब्देनात्र यज्ञः । उव्वटभाष्यानुसारेणापि स्वःशब्देन यज्ञोऽभिधीयते। यज्ञार्हदेवाः सूर्यः यज्ञोऽपि स्वःशब्देनोच्यते।**

**शब्दविमर्शः**

**सूपपदादर्त्तेः कर्तरि विचि स्वःशब्दनिष्पत्तिः । स्वशब्द आदित्यवाचकः – स्वरादित्यो भवति ।** [९०] **अमरकोषानुसारेण स्वःशब्दः स्वर्गवाची परलोकवाची वा– स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः ।**[९१] **स्वर्गे परे च लोके स्वः**[९२] **इति।**

---

[८७] निरुक्तम् ३.२.९, पृ. १२०।

[८८] कात्यायनश्रौतसूत्रम् ३.२.१३, पृ.

[८९] शतपथब्राह्मणम् १.१.२.२१, पृ.

यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्।

अभिलाषोपनीतञ्च तत्सुखं स्वःपदास्पदम्॥ वाचस्पत्यम्।

सामान्यतः स्वःशब्देन स्वर्गस्य बोधो भवति, परमित्यत्र शब्देनानेन यज्ञो बुध्यते । स्वर्गहेतुत्वात् स्वःशब्दो यज्ञबोधकः।

### ३.१५ अदितिः

शब्दसन्दर्भः -

भूतायत्वा नारातये.................. सादयाम्यदित्या..................। (शु.वेदः १/११)

मन्त्रभागोऽयं हविरासादने विनियुक्तः। हे हविस्त्वां अदित्याः भूम्याः उपस्थेऽङ्के सादयामीति।

शब्दविमर्शः -

दोधातोः क्तिन्प्रत्यये, नञ्समासे च अदितिशब्दः संसिद्ध्यति । शब्देनानेन पृथिव्या देवमातुश्च बोधो भवति । दातुं छेत्तुमयोग्या अदितिरिति व्युत्पादयन् आप्टेमहाभागः शब्देनानेन पृथिव्याबोधं विदधाति । तथैव अदितेरपत्यं पुमान् आदित्यः । आदित्यशब्दो देवानां

---

[९०] निरुक्तम्, २.४.१४, पृ. ८६।

[९१] अमरकोषः, ११।

[९२] पूर्ववत्, २८४४।

बोधकत्वेनादितिर्देवमातेति ।[९३] निरुक्तकारस्तु अदितिशब्देन देवमातरमेव प्रतिपादयति – अदितिरदीना देवमाता इति ।[९४] परं मन्त्रभागेऽस्मिन् शब्दोऽयं भूमिवाचकः ।

### ३.१६ अग्रेगुवः/अग्रेपुवः

शब्दसन्दर्भः –

पवित्रेस्थो ...............देवीरापो अग्रेगुवो अग्रेपुवो............ । (शु.वेदः १/१२)

मन्त्रभागोऽयं जलोत्पवने विनियुक्तः । अपां विशेषणौ शब्दाविमौ । अग्रे गच्छन्तीति अग्रेगुवः, अग्रे पुनन्तीति अग्रेपुवः ।

शब्दविमर्शः –

आपः पुरतो निम्नप्रदेशं प्रति गच्छन्तीति गमनशीलाः अग्रेगुवो भवन्ति । अग्रे यस्मिन् भागे गच्छन्ति, तस्मिन् अपहतिनिवारणेन शोधनं कुर्वन्तीति शोधनशीलाः अग्रेपुवो भवन्ति ।

### ३.१७ शर्म

शब्दसन्दर्भः –

शर्मास्यवधूतꣳरक्षः................... (शु.वेदः १/१४)

अयं मन्त्रभागः कृष्णाजिनादाने विनियुक्तः। हे कृष्णाजिन ! त्वमुलूखलस्य धारणार्थं शर्म सुखहेतुरसि ।

---

[९३]संस्कृत–हिन्दी–कोशः, पृ. २२ ।

[९४] निरुक्तम् ४.४.२२ ।

शब्दविमर्शः –

शर्मेति सुखनाम – स्यादानन्दथुरानन्दः शर्मसातसुखानि च।[९५] निरुक्तेऽपि शर्मशब्दस्यार्थः सुखमिति विहितोऽस्ति ।[९६] कृष्ण इति मृगविशेषस्तस्याजिनं कृष्णाजिनम् ।[९७] कृष्णाजिनं सुखकरत्वात् शर्मेत्युच्यते ।अजिनस्य चर्मेति मानुषं नाम, शर्मेति दैवं नाम – चर्म्म वा एतत्कृष्णस्य, तदस्य तन्मानुषम्, शर्म्म देवत्रेति ।[९८]दयानन्दस्तु शब्देनानेन सुखकारकस्य गृहस्य स्वीकरणं करोति – शर्म इति गृहनामसु पठितम् । [९९]

३.१८ पृथुबुध्नः

शब्दसन्दर्भः –

शर्मास्यवधूतꣳरक्षः............ पृथुबुध्नः.......... (शु.वेदः १/१४)

अयं मन्त्रभागः उलूखलनिधाने विनियुक्तः। उलूखलस्य विशेषणमिदं पदम्। हे उलूखल ! त्वं पृथुबुध्नः स्थूलमूलोऽसि। मुसलघातोपद्रवेण चाञ्चल्यराहित्याय मूलस्थूलत्वमुलूखलस्य।

शब्दविमर्शः –

पृथुशब्दस्यार्थः विशालम् – विशंकटं पृथु बृहद्विशालं पृथुलं महत् इति ।[१००] बन्धधातोर्नक्प्रत्ययेन[१०१] संसिद्धस्य बुध्नशब्दस्यार्थः वृक्षमूलम् – मूलं बुध्नोऽङ्घ्रिनामकः

---

[९५]अमरकोषः २६४।

[९६] निरुक्तम् ९.१८, ९.३१।

[९७] कात्यायनश्रौतसूत्रम् २.४.१।

[९८]शतपथब्राह्मणम् १.१.४.४।

[९९] निघण्टुः, ३.४।

[१००]अमरकोषः २१४५।

इति।[१०२] पृथुश्चासौ बुध्नः पृथुबुध्नो बृहन्मूलम् । उलूखलस्य विस्तीर्णमूलत्वं प्रसिद्धमेवेति । दयानन्दस्तु शब्देनानेन मेघार्थं द्योतयति – पृथु विस्तीर्णं बुध्नमन्तरिक्षं निवासार्थं यस्य स पृथुबुध्नो मेघ इति[१०३] ।

**यज्ञप्रसङ्गः –**

उलूखलपात्रं यज्ञेषु चरुपुरोडाशसम्बन्धीनां ब्रीह्यादीनां कण्डनायोपयुज्यते। तदुलूखलपात्रं पलाशकाष्ठनिर्मितं भवति । तस्याधोभागो विस्तृतो भवति, आकारश्च स्थूलः । यज्ञमधुसूदन्यामस्यार्थपरकं निर्वचनं विहितमस्ति, यथा— उपरितनार्धभागे बिलयुतं पृथुबुध्नं यथेच्छप्रमाणं चोलूखलं कार्यम् । तच्च चरुपुरोडाशसम्बन्धिब्रीह्यादीनां कण्डनायोपयुज्यते ।[१०४] उलूखलशब्दस्य निर्वचनं कुर्वन् यास्क आह— उलूखलमुरुकरं वोर्करं वोर्ध्वखं वा । उरु मे कुर्वित्यब्रवीत् तदुलूखलमभवत् उरुकरं चैतदुलूखलमित्याचक्षतेऽपरोक्षेणेति ।[१०५] पलाशकाष्ठनिर्मितं द्वादशाङ्गुलपरिमितोच्छ्रायं उपरितनार्धभागे बिलयुक्तं चरुपुरोडाशसम्बन्धिब्रीह्यादिकण्डनोपयोगि उलूखलमित्युच्यते।[१०६]

### ३.१९ हविः

**शब्दसन्दर्भः –**

अग्नेस्तनूरसि............देवेभ्यो हविः शमीष्व.......... (शु.वेदः १/१५)

---

[१०१]संस्कृत–हिन्दी–कोशः, पृ. ७१९ ।

[१०२]अमरकोषः ६७२ ।

[१०३]यजुर्वेदभाष्यम्, १.१४ ।

[१०४]यज्ञमधुसूदनी, पृ.२७ ।

[१०५] निरुक्तम्, ९.२० । शतपथब्राह्मणम्,७.५.१.२२ ।

[१०६]श्रौतपदार्थनिर्वचनम्, पृ.८ ।

अयं मन्त्रभागः मुसलाधाने विनियुक्तः। हे मुसल ! त्वं देवेभ्य इदं हविर्व्रीहिरूपं शमीष्व शमय।

**शब्दविमर्शः -**

हूयते इति हविः। हुधातोरसुन्प्रत्ययेन संसिद्धस्यास्य शब्दस्यार्थः हवनीयः द्रव्यविशेष इति।[१०७] वहति विधिहुतं या हविः।[१०८]हवींषि बहुप्रकारकाणि भवन्ति। ब्रीहिपिष्टैर्यवपिष्टैर्वा निर्मितः पुरोडाशः, दधिसक्तुरूपं करम्भपात्रम्, वपारूपं हविरित्यादीनि हविषामेव रूपाणि। अमरकोषकारस्य मते तु हविःशब्देन घृतमात्रस्य बोधो भवति – घृतमाज्यं हविः सर्पिरिति।[१०९]

**३.२० कुक्कुटः**

**शब्दसन्दर्भः -**

कुक्कुटोऽसि...................... (शु.वेदः १/१६)

अयं मन्त्रभागः शम्याहनने विनियुक्तः। हे शम्यारूप यज्ञायुधविशेष !त्वं कुक्कुटोऽसि असुराणाम्।

**शब्दविमर्शः -**

असुरा क्व क्वेति। तानसुरान् हन्तुमिच्छन्योऽटति सर्वत्र सञ्चरति स कुक्कुटः। यद्वा कुकं कुत्सितं शब्दं असुरघ्नं असुराणां कुटति तनोतीति कुक्कुटः। यद्वा कुक्कुटाख्यपक्षिवद्

---

[१०७]संस्कृत-हिन्दी-कोशः,, पृ. ११६८।

[१०८] मनुस्मृतिः ३.८७।

[१०९] अमरकोषः १८१०।

ध्वनिविशेषमसुरभीत्यर्थं तनोतीति कुक्कुट इत्युपचर्यते ।[110]अमरकोषकारः कुक्कुटशब्दस्यार्थं पक्षिविशेषं विदधाति – कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः ।[111] दयानन्दस्तु कुकं परद्रव्यादातारं चोरं शत्रुं वा कुटति येन स कुक्कुट इति व्युत्पादयन् यज्ञापरपर्यायत्वं सिद्धयति।

### ३.२१ वर्षवृद्धम्

शब्दसन्दर्भः –

कुक्कुटोऽसि................. वर्षवृद्धमसि............ (शु.वेदः १/१६)

अयं मन्त्रभागः शूर्पादाने विनियुक्तः। शूर्पस्य वैशिष्ट्यं ज्ञापयतीदं पदम्। हे शूर्प ! त्वं वर्षवृद्धमसि वर्षेण वृष्ट्या तद्भूतजलेन वृद्धमसि।

शब्दविमर्शः –

यज्ञेषु कण्डितस्य हविषः निष्पवनसाधनीभूतम् अरत्निमात्रदीर्घं पात्रं शूर्पमुच्यते । शूर्पं वंशनिर्मितं भवति । उक्तमपि यच्छ्रुतौ – अथ शूर्पमादत्ते वर्षवृद्धमसीति, वर्षवृद्धं ह्येतत् यदि नडानां यदि वेणूनां यदीषीकाणाम् ।[112] तथैव देवयाज्ञिके – शूर्पञ्च नडतृणमयमीषीकानिर्मितं वेणुदलनिर्मितं वा भवतीति।[113] दृश्यते चान्यत्र–

---

[110]शुक्लयजुर्वेदसंहिता, महीधरभाष्यम् १.१६।

[111] अमरकोषः १०२२।

११२ शतपथब्राह्मणम् १.१.४.१९।

११३ कात्यायनश्रौतसूत्रम् २.३.८। (भाष्ये)

शूर्पं त्वरत्निमात्रं स्यादैषिकं वैणवन्तु वा।

लम्बं त्वरत्निमात्रं स्यात् ...।[११४]

प्रकृतिभूते हविर्यज्ञानां तृतीये दर्शपौर्णमासप्रकरणे तद्विकृतिषु च पौरोडाशिके कर्मणि प्रयुज्यमानं वंशनिर्मितं पुरोडाशादिसम्बन्धिनां व्रीह्यादीनां निरतुषकरणोपयोगि पात्रं शूर्पमुच्यते।[११५] वर्षवृद्धवेणुशलाकानिर्मितत्वात् शूर्पस्य वर्षवृद्धत्वम्।

### ३.२२ हिरण्यपाणिः

**शब्दसन्दर्भः -**

कुक्कुटोऽसि................ सविता हिरण्यपाणिः............ (शु.वेदः १/१६)

अयं मन्त्रभागः हविर्मन्त्रणे विनियुक्तः। सवितुर्विशेषणमिदं पदम्।

**शब्दविमर्शः -**

हिरण्ययुक्तावङ्गुलीयाद्याभरणयुक्तौ पाणी यस्य स हिरण्यपाणिः। यद्वा दैत्यैः प्राशित्रप्रहारेण छिन्नौ सवितुः पाणी देवैर्हिरण्मयौ कृताविति बह्वृचश्रुतिकथा।[११६] अनेनैव सवितुर्हिरण्यपाणित्वमिति।

---

११४ स्मार्तोल्लासः, पृ. ३४।

११५ श्रौतपदार्थनिर्वचनम्, पृ.८।

११६ शुक्लयजुर्वेदसंहिता, महीधरभाष्यम्, १.१६।

## ३.२३ धृष्टिः

शब्दसन्दर्भः –

धृष्टिरस्यपाग्ने........................ (शु.वेदः १/१७)

अयं मन्त्रभागः उपवेषादाने विनियुक्तः। उपवेषस्य विशेषणमिदं पदम्। पलाशशाखाया मूलदेशे छिन्नः काष्ठभाग उपवेषः। हे उपवेष ! त्वं धृष्टिरसि प्रगल्भोऽसि। तीव्राङ्गाराणामितस्ततश्चालने प्रभुत्वादस्य प्रागल्भ्यम्। अनेनाग्निर्धृष्टमुपचरतीति धृष्टिरुपवेषः।

शब्दविमर्शः –

धृष्यतेऽनेनेति व्युत्पत्तौ करणेऽर्थे 'ञिधृषा प्रागल्भ्ये' इत्यस्माद्धातोः क्तिन्-प्रत्ययेन धृष्टिशब्दो निष्पद्यते । दयानन्दश्च प्रगल्भ इव यजमानः[११७]इत्युदीरन् यजमानस्य निर्भयत्वं सिद्धयति ।अत एव शतपथब्राह्मणं धृष्टिशब्दं निर्वक्ति– यदेनेनाग्निं धृष्णिववोपचरति तेन धृष्टिः। [११८] अग्निहोत्रचन्द्रिकायां धृष्टिशब्दस्य प्राकरणिकोऽर्थः निर्दिष्टः– धृष्टिर्यस्य कस्यचिद्यज्ञियकाष्ठस्य कार्या । ...सा प्रादेशमात्राऽरत्निमात्रा वा कार्या ।[११९] अन्यत्र च धृष्टिशब्दस्य व्युत्पत्तिमूलमर्थं प्राप्तुं शक्यते– मेक्षणसदृश-कपालोपधाने गार्हपत्यादङ्गारोद्धरणादौ उपयोगिनी धृष्टिरित्युच्यते । [१२०] प्रागल्भ्यार्थे प्रसिद्धः यज्ञीयकाष्ठनिर्मितः हस्ताकृतिसदृशः यज्ञीयपात्रविशेषः अन्वर्थसंज्ञां भजते । अत एव

---

[११७]यजुर्वेदभाष्यम्, १.१७।

[११८]शतपथब्राह्मणम्, १.२.१.३।

[११९] अग्निहोत्रचन्द्रिका, पृ.३।

[१२०]श्रौतपदार्थनिर्वचनम्, पृ.१०।

यज्ञमधुसूदन्याम्— तेनात्युष्णमपि द्रव्यं सहसा गृहीतुं प्रगल्भते तस्मात् धृष्टिः[१२१] इति । अङ्गारापोहनसमर्थम् उपवेषाख्यं हस्ताकृतिकाष्ठं धृष्टिसंज्ञकम् ।[१२२] अतः उपवेषस्यैव अपरं नाम धृष्टिरिति।

### ३.१४ भ्रातृव्यः

**शब्दसन्दर्भः –**

धृष्टिरस्यपाग्ने..................भ्रातृव्यस्य वधाय । (शु.वेदः १/१७)

अयं मन्त्रभागः कपालस्थापने विनियुक्तः । शब्दोऽयं शत्रुवाची । हे कपाल ! भ्रातृव्यस्य शत्रोरसुरस्य पाप्मनो वा वधाय अङ्गारे स्थापयामि इति।

**शब्दविमर्शः –**

भ्रातृशब्दाद् व्यत्प्रत्ययेन संसिद्धस्य भ्रातृव्यशब्दस्यार्थः भ्रातृपुत्रः शत्रुश्चेति – भ्रातृव्यौ भ्रातृजद्विषौ।[१२३] आद्युदात्तत्वादित्यत्र भ्रातृव्यशब्दः शत्रुवाची।[१२४]

**यज्ञप्रसंगः –**

पुरोडाशपाकार्थं मृत्तिकानिर्मितं वह्नौ पक्वं द्व्यङ्गुलोच्छ्रितं कपालमुच्यते।[१२५] कपालेषु पुरोडाशरुपाणि हवींषि पच्यन्ते। तानि च कपालानि वह्नौ निधीयन्ते। तत्रैव प्रार्थ्यते – हे कपाल ! भ्रातृव्यस्य शत्रोर्वधाय त्वामङ्गारे स्थापयामीति।

---

१२१ यज्ञमधुसूदनी, पृ.३२।

१२२ कातीयेष्टिदीपकः, पृ.१४।

१२३ अमरकोषः, २६२७ ।संस्कृत-हिन्दी-कोशः,पृ. ७५७।

१२४ शुक्लयजुर्वेदसंहिता १.१७।

### ३.२५ मही

शब्दसन्दर्भः -

धान्यमसि..................महीनां पयोऽसि । (शु.वेदः १/२०)

अयं मन्त्रभागः आज्यनिर्वापे विनियुक्तः । महीति गोनाम । हे आज्य ! त्वं महीनां गवां पयोऽसि इति ।

शब्दविमर्शः -

'महपूजायाम्' इत्यस्माद्धातोरच्प्रत्ययेन ङीष्प्रत्ययेन च महीशब्दस्य सिद्धिर्जायते ।[१२६] मह्यते पूज्यते इति मही । महीशब्दोऽयं पृथिवीवाचकः - गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही ।[१२७]परं मन्त्रभागेऽस्मिन् शब्दोऽयं गवां वाचकः ।

### ३.२६ अतमेरुः

शब्दसन्दर्भः -

माभेर्म्मा................ अतमेरुर्यज्ञो .........। (शु.वेदः १/२३)

अयं मन्त्रभागः पुरोडाशाभिवासने विनियुक्तः । पुरोडाशस्य विशेषणमिदं पदम् ।

---

[१२५]माध्यन्दिन-शतपथब्राह्मणम् (परिशिष्टभागः), पृ. ७१९ ।

[१२६]संस्कृत-हिन्दी-कोशः,पृ. ७८८ ।

[१२७]अमरकोषः ५६३ ।

**शब्दविमर्शः –**

'तमु ग्लानौ'इत्यस्माद्धातोः शब्दस्यास्य निष्पत्तिर्जायते । ताम्यतीति तमेरुः । औणादिक एरुप्रत्ययः । न तमेरुरतमेरुः । हे पुरोडाश ! भस्माच्छादनेन ग्लानिरहितो भवतु । यजमानस्य प्रजा पुत्रपौत्रप्रपौत्रादिः ग्लानिरहितो भूयात् । यजमानस्य प्रजायाः कदाचिद् दुःखं मास्त्वित्यर्थः ।

**यज्ञप्रसंगः –**

यवचूर्णनिर्मितो ब्रीहिचूर्णनिर्मितो वा कपालेषु संस्कृतः रोटिकाविशेषः पुरोडाश इत्युच्यते । पुरोडाशः तप्तेषु कपालेषु अधः पाकार्थमधिश्रीयते उपरि च अङ्गारा अभ्युह्यन्ते ।[१२८]तथापि हे पुरोडाश ! त्वमतमेरुः ग्लानिरहितो भवत्विति भावः ।

## ३.१७ क्रूरः

**शब्दसन्दर्भः –**

पुरा क्रूरस्य.................... । (शु.वेदः १/२८)

अयं मन्त्रभागः वेदिमार्जने विनियुक्तः । क्रूरशब्दोऽत्र संग्रामवाची । संग्रामो वै क्रूरमिति श्रुतिः।[१२९]

**शब्दविमर्शः –**

'कृती छेदने' इत्यस्माद्धातोः रक्प्रत्ययः, क्रूरादेशश्च ।[१३०] सामान्यतः शब्दोऽयं कठोरवाचको निर्दयवाचकश्च – क्रूरौ कठिननिर्दयौ इति ।[१३१]कृन्तत्यङ्गानि यस्मिन् सः क्रूरः ।

---

१२८ मीमांसाकोषः, पृ. २५८४ ।

[१२९]शतपथब्राह्मणम् १.२.५.१९ ।

मन्त्रभागेऽस्मिन्नयं शब्दः संग्रामवाची विद्यते – संग्रामो वै क्रूरम्, संग्रामे हि क्रूरं क्रियते, हतः पुरुषो हतोऽश्वः शेते इति ।[१३२] संग्रामे पुरुषाश्वादेश्चतुरङ्गबलस्य हननलक्षणात् क्रूरकरणात् तदधिकारभूतः संग्रामोऽपि क्रूरशब्देन प्रतिपाद्यत इत्यर्थः ।

## ३.२८ विरप्शी

**शब्दसन्दर्भः –**

पुरा क्रूरस्य............ विरप्शिन्नुदादाय.........। (शु.वेदः १/२८)

अयं मन्त्रभागः वेदिमार्जने विनियुक्तः। विरप्शीति महन्नाम।

विविधं रपति वेदत्रयरूपेण शब्दं करोतीति विरप्शी। शब्देनानेन विष्णुः सम्बोध्यते।

**शब्दविमर्शः –**

'रप लप व्यक्तायां वाचि' इत्यस्माद्धातोः शक्प्रत्ययेन शब्दोऽयं संसिद्ध्यति । विविधं रपन्तीति विरप्शाः स्तोतारः, तेऽस्य सन्तीति मत्वर्थे इनिः । यद्वा रपणं रप्शं स्तुतिः, विविधं रप्शं यस्येति विरप्शी । विरप्शी विरयणशीलः । यास्केन स्वकीये ग्रन्थे सायणमुद्धृत्य शब्दस्यास्यार्थः प्रतिपादितोऽस्ति – भुजास्फालनेन युद्धार्थं शत्रूणामाह्वानकारीति विरप्शी ।[१३३]

---

[१३०] निरुक्तम् ५.२२।

[१३१] अमरकोषः २७१८।

[१३२] शतपथब्राह्मणम् १.२.५.१९।

[१३३] निरुक्तम् ६.५.२३।

### ३.२९ स्वधा

**शब्दसन्दर्भः –**

पुरा क्रूरस्य............ स्वधाभिस्तामु .........। (शु.वेदः १/२८)

अयं मन्त्रभागः वेदिमार्जने विनियुक्तः । स्वधाशब्दो यद्यप्यन्नवाची तथाप्यत्रान्नहेतुभूता वेदत्रयी कथ्यते।

**शब्दविमर्शः –**

स्वद्यतेऽनेनेति व्युत्पत्या 'स्वद आस्वादने' इत्यस्माद्धातोः शब्दस्यास्य सिद्धिर्जायते । शब्दोऽयं देवानां हविर्दानात्मको मन्त्रः – स्वाहा देवहविर्दाने श्रौषट् वौषट् वषट् स्वधा ।[१३४] 'पितृभ्यः स्वधा' इत्यादिषु प्रयोगदर्शनादयं शब्दः विशेषतः पितृणां दानमन्त्रः । स्वान् दधातीति व्युत्पत्या धाधातोः क्विप्प्रत्ययनेन च शब्दोऽयं संसिद्ध्यति। तस्यार्थो दक्षकन्येति। सा तु पितृणां पत्नीति भागवतमतं विद्यत इति ।[१३५] स्वधाशब्दोऽन्नवाची विद्यते – स्वधेति अन्ननाम ।[१३६]परं मन्त्रभागेऽस्मिन् शब्देनानेनान्नहेतुभूता वेदत्रयी बुध्यते।

### ३.३० प्रोक्षणीः

**शब्दसन्दर्भः –**

पुरा क्रूरस्य............ प्रोक्षणीरासादय .........। (शु.वेदः १/२८)

अयं मन्त्रभागः वेदिमार्जने विनियुक्तः ।प्रोक्ष्यन्ते आभिरिति प्रोक्षण्य आपः ।आसादय वेद्यां स्थापय।

---

[१३४] अमरकोषः २८६४।

[१३५]शब्दकल्पद्रुमः (इन्टरनेटमाध्यमेन)।

[१३६] निघण्टुः २.७.१७।

शब्दविमर्शः -

प्रकृष्टतया सिञ्चन्ति याभिः क्रियाभिः पात्रैर्वा ताः प्रोक्षणीः । प्रकर्षेण उक्ष्यते सिच्यते आभिरद्भिरित्यर्थे प्र-उपसर्ग-पूर्वकात् "उक्ष सेचने" इत्यस्माद्धातोः ल्युटि ङीषि च कृते प्रोक्षणीशब्दो निष्पद्यते । ब्रीह्यादिद्रव्याणां प्रोक्षणार्थमग्निहोत्रहवण्यां स्थापिता संस्कृता आपः प्रोक्षणीशब्दवाच्याः। अत एव श्रौतपदार्थनिर्वचनग्रन्थेप्रोक्षणीशब्दस्य निर्वचनमेवं निर्दिष्टम्— ब्रीह्यादिप्रोक्षणार्थमग्निहोत्रहवण्यां गृहीताः संस्कृता आपः प्रोक्षणीपदवाच्याः ।[१३७] संहिताव्याख्यायां ब्राह्मणव्याख्यायाञ्च आचार्यः सायणः प्रोक्षणीशब्देन शुद्धा आपः सूचयति— प्रोक्ष्यत आभिरिति प्रोक्षण्यः, उत्पवनादिसंस्कृता आप इति ।[१३८]

### ३.३१ यजुः

शब्दसन्दर्भः -

अदित्यै रास्नासि................ यजुषे। (शु.वेदः १/३०)

अयं मन्त्रभागः आज्यावेक्षणे विनियुक्तः ।यजुश्शब्दो यागवाची ।हे आज्य ! त्वं यजुषे यागाय भव।

शब्दविमर्शः -

यज् धातोरुसि प्रत्यये निष्पन्नो यजुश्शब्दो विविधमर्थं सूचयति । आचार्यो यास्को यज्ञीयमन्त्राणां यजुस्संज्ञां प्रयुङ्क्ते- यजुर्यजतेः ।[१३९] इज्यते अनेन इति यजुः। यैर्मन्त्रैर्यज्ञः सम्पाद्यते ते मन्त्रा यजुस्संज्ञकाः । अनियताक्षरावसानो यजुःअर्थात् येषु मन्त्रेष्वक्षरसंख्यया

---

१३७ श्रौतपदार्थनिर्वचनम्, पृ. १७।

१३८ शतपथब्राह्मणम्, १४.१.३.२। ऐतरेयब्राह्मणम्, ५.८ (भाष्ये)।

१३९ निरुक्तम्,७.३.१२।

पादव्यवस्थाभावस्तादृशो गद्यात्मको मन्त्रभागो यजुश्शब्देनाभिधीयते। जैमिनिना च ऋक्सामभिन्ने गद्यात्मके मन्त्रभेदे यजुश्शब्दः प्रयुक्तः – शेषे यजुः शब्दः ।[१४०] ऋक्सामभ्यां यदन्यत् प्रश्लिष्टपठितं मन्त्रजातं तद्यजुरिति। सामान्यतः यजुश्शब्दःश्रूयते चेत्तेन यजुर्वेदस्यैव प्राथमिको बोधो भवति। किञ्च यजुर्वेदो यागप्रधानः। अतः शब्दोऽयं यागवाचकः।

### ३.३१ कृष्णः

शब्दसन्दर्भः –

कृष्णोस्याखरेष्ठः......................। (शु.वेदः २/१)

मन्त्रभागोऽयम् इध्मप्रोक्षणे विनियुक्तः । हे इध्म ! त्वं कृष्णः कृष्णमृगरूपो यज्ञोऽसीति । कृष्णशब्दो वर्णवचनोऽन्तोदात्तः, मृगवचन आद्युदात्तः । आद्युदात्तत्वादिह कृष्णशब्दो मृगवाची । इध्म कथं कृष्णमृगः ? इति जिज्ञासायाम् – यज्ञो ह देवेभ्योऽपचक्राम स कृष्णो भूत्वा चचार इति श्रुतेः ।[१४१] यज्ञसाधनत्वादिध्म यज्ञ इत्युच्यते।

शब्दविमर्शः –

कृष्धातोर्नक्प्रत्ययेन कृष्णशब्दो निष्पद्यते । शब्दोऽयमनेकार्थकः। शब्देनानेन वर्ण–पक्ष–मृगविशेषप्रभृतीनां विष्णोरवतारस्य च बोधो भवति ।[१४२] कृष्णः काके पिके वर्णे विष्णौ

---

१४० मीमांसासूत्रम्,२.१.३७।

[१४१]शतपथब्राह्मणम् १.१.४.१।

[१४२]संस्कृत–हिन्दी कोशः, पृ. २९९।

व्यासेऽर्जुने कलौ इति हैमः । निरुक्तशास्त्रे तु कृष्णशब्दो वर्णवाचकत्वेन एव निर्ब्रूतो विद्यते – कृष्णं कृश्यतेर्निकृष्टो वर्ण इति।[१४३]

### ३.३३ आखरेष्ठः

**शब्दसन्दर्भः –**

कृष्णोस्याखरेष्ठः................। (शु.वेदः २/१)

मन्त्रभागोऽयम् इध्मप्रोक्षणे विनियुक्तः। शब्दोऽयम् इध्मविशेषणम्।हे इध्म ! त्वमाखरेष्ठोऽसीति।

**शब्दविमर्शः –**

आ समन्तात् खरे कठिने वृक्षे तिष्ठतीति आखरेष्ठः । यद्वा खं स्वर्गं राति ददातीति खरः, आहवनीयस्तत्रासमन्तात्तिष्ठतीत्याखरेष्ठः । यज्ञः कदाचिद्देवेभ्योऽपक्रान्तः, स्वगोपनाय कृष्णमृगो भूत्वा वने यज्ञियतरुमध्ये प्रविश्य कुत्रचित्कठिने वृक्षे तस्थौ । तदेतदभिप्रेत्य इध्म आखरेष्ठ इत्युच्यते।

**यज्ञप्रसंगः –**

किमिध्ममिति जिज्ञासायाम् – इध्यतेऽग्निरनेन इति इध्मम् । 'ञिइन्धी–दीप्तौ' इत्यस्माद्धातोर्मक्–प्रत्ययेन इध्मशब्दो निष्पद्यते । पलाशादिवृक्षोद्भवाः अरत्निमात्रा अष्टादशसमिधः समुदायेन इध्ममित्युच्यते । आम्रपलाशादीनां श्रौतयागे प्रयोज्यमाना समिध इत्यर्थः।

---

[१४३] निरुक्तम् २.६.१९ ।

### ३.३४ स्तुपः

शब्दसन्दर्भः -

अदित्यैव्युन्दनमसिविष्णोः स्तुपोसि............. । (शु.वेदः २/२)

अयं मन्त्रभागः प्रस्तरग्रहणे विनियुक्तः । शब्दोऽयं प्रस्तरस्य विशेषणम् । हे दर्भमुष्टिरूप प्रस्तर ! त्वं विष्णोर्यज्ञस्य स्तुपोऽसीति ।

शब्दविमर्शः -

'ष्ट्यै स्त्यै शब्दसंघातयोः' इत्यस्माद्धातोरौणादिके डुप्रत्यये शब्दस्यास्य सिद्धिर्भवति ।मन्त्रेऽस्मिन् स्तुपशब्दः प्रस्तरस्य विशेषणमस्ति । स्त्यायतेः संघातेऽर्थे संसिद्धस्य स्तुपशब्दस्यार्थोभाष्यकारैर्यज्ञस्यशिखारूपेण विहितोऽस्ति । यज्ञो वै विष्णुस्तस्येयमेव शिखा स्तुपः ।[१४४] प्रस्तरः कथं शिखेति जिज्ञासायाम्- प्रस्तरो दर्भसंघातरूपत्वात्केशसंघातरूपा शिखेति ।[१४५]

यज्ञप्रसंगः -

कश्च प्रस्तरः ? प्र-उपसर्गपूर्वकात् स्तृ-धातोः अच्-प्रत्ययेन प्रस्तरशब्दो निष्पद्यते । प्रस्तरो नाम कुशमुष्टिः । छिन्नासु चतसृषु दर्भमुष्टिषु या प्रथमा मन्त्रैः संस्कृता दर्भमुष्टिः ( दर्भसंघातः) वेद्यां जुहूर्यस्यां निधीयते, विधृतिसंज्ञकयोः उदगग्रयोर्दर्भयोरुपरि च या प्रागग्रा स्थापिता भवति सा प्रस्तर इत्युच्यते ।[१४६]

---

[१४४]शतपथब्राह्मणम्, १.३.३.५ ।

[१४५]शुक्लयजुर्वेदसंहिता २.२ ।

१४६ यज्ञतत्त्वप्रकाशः, पृ.१२ ।

## ३.३५ परिधिः

**शब्दसन्दर्भः -**

गन्धर्वस्त्वाविश्वावसुः...............परिधिरस्यग्निः..............। (शु.वेदः २/३)

मन्त्रभागोऽयमग्निपरिधाने विनियुक्तः।हे परिधे !त्वं यजमानस्य परिधिरसि, न केवलमग्नेरिति।

**शब्दविमर्शः -**

परितः धीयन्ते स्थाप्यन्ते समिधः इति परिधयः। परि-उपसर्गपूर्वकाद् धा-धातोः कर्मणि किप्रत्ययेन परिधिशब्दो निष्पद्यते। श्रौताग्निं परितः समन्त्रकं समित्त्रयाणां स्थापनं भवति, तत् परिधिस्थापनमित्युच्यते। विद्याधरस्त्वेवमाह— आहवनीयस्य परितो निधीयन्ते इति परिधय इति।[१४७]आहवनीयाग्नेः पश्चिमदक्षिणोत्तरदिक्षु मेखलोपरि स्थापनार्थं मेखलापरिमितं काष्ठत्रयं परिधिः कथ्यते। मधुसूदनानुसारेण— परिधयस्तु त्रैपर्णा बाहुमात्रा अपुष्कराः कार्याः इति।[१४८] तैत्तिरीयसंहितायां परिधिकाष्ठानां निर्देशनं प्राप्यते यथा—कार्ष्मर्यमया परिधयो भवन्ति इति।[१४९] ऋग्वेदसंहितायामावरणार्थे परिधिशब्दस्य प्रयोगो दृश्यते। सायणः परिधिशब्दस्यार्थः राक्षस इत्यपि चकार— परिधीयत एभिः सर्वमिति परिधयो राक्षसाः।[१५०] अन्यत्र च सायण आह—

---

१४७ कात्यायनश्रौतसूत्रम् (भूमिकाखण्डः), पृ.३५।

१४८ यज्ञमधुसूदनी,पृ.३२।

१४९ तैत्तिरीयसंहिता, ६.२.१.६।

१५० ऋग्वेदसंहिता, ९.९६.११ (भाष्ये)।

परिधिपरिधानमग्नेः कवचबन्धनमेव भवतीति।[१५१] अग्नेः कवचत्वं परिधीनामिति शतपथब्राह्मणे प्राप्यते— गुप्त्यै वा अभितः परिधयो भवन्ति।[१५२]

### ३.३६ जुहूः

**शब्दसन्दर्भः -**

घृताच्यसिजुहूर्नाम्ना................। (शु.वेदः २/६)

मन्त्रभागोऽयं जुहूनिधाने विनियुक्तः। जुहूरिति होमसाधनभूतः पात्रविशेषोऽस्ति।

**शब्दविमर्शः -**

जुहोति अनया सा जुहू। हुधातोः क्विपि निपातनात् द्युतिगमिजुहोतीनां द्वे च जुहोतेर्दीर्घश्च द्वित्वञ्च सत् जुहूशब्दो निष्पद्यते। पलाशकाष्ठनिर्मिता अग्निहोत्रहवणीसदृशी मुख्यहोमकरणत्वात् हूयतेऽनयेति व्युत्पत्या जुहू पदवाच्या।[१५३] आचार्य सायणः ऋक्संहिताभाष्ये जुहूशब्देन आज्यमपि सूचयति— हूयन्ते इति जुह्व आहूतयः सोमादिरूपाः। अथवा जुह्वादिषु स्थितानि आज्यानि अपि आश्रयाश्रयिणोः अभेदेन जुह्व इत्युच्यन्ते[१५४]। आचार्यः कात्यायनः जुहूः पलाशकाष्ठनिर्मिता भवतीति ब्रवीति— पालाशी जुहूः[१५५]। सर्वाऽपि स्रुचः जुहूपभृद्ध्रुवाप्रचरण्यग्निहोत्रहवण्याद्याः बाहूप्रमाणाः पाणिप्रमाणमुखाः त्वक्प्रदेशे बिलवत्यः

---

१५१ शतपथब्राह्मणम्, १.३.३.१४ (भाष्ये)।
१५२पूर्ववत्, १.३.४.१।
१५३श्रौतपदार्थनिर्वचनम्, पृ.८।
१५४ ऋग्वेदसंहिता, १.१४५.२। (भाष्ये सायणः)
१५५कात्यायनश्रौतसूत्रम्, १.३.३१।

हंसमुखसदृशैकप्रणालिकाः मूलदण्डाः कर्तव्याः । सूत्रञ्च कात्यायनीयम्– बाहुमात्र्यः स्रुचः पाणिमात्रपुष्करास्त्वग्बिलाहंसमुखप्रसेकामूलदण्डा भवन्ति ।[१५६]जुह्वादीनां स्रुचां चतसृणामायामं चतुर्विंशत्यङ्गुलं बाहुमात्रं वा.....गजस्योष्ठवद् वा बिलं निम्नमग्रान्तं घृतधारापातनार्थं कुल्यां च कारयेत् ।[१५७] अतः जुहूर्नाम पलाशकाष्ठनिर्मिता बाहुमात्रा हंसमुखप्रणालिका होमसाधनभूता स्रुक् इति।

## ३.३७ प्रियधाम (प्रियेण धाम्ना)

शब्दसन्दर्भः -

घृताच्यसि............सेदं प्रियेण धाम्ना....। (शु.वेदः २/६)

मन्त्रभागोऽयं जुहूनिधाने विनियुक्तः । प्रियधामशब्देनाऽऽज्यमुक्तमित्यत्र । एतद्वै देवानां प्रियतमं धाम यदाज्यमिति श्रुतिः ।[१५८]

## ३.३८ ध्रुवा

शब्दसन्दर्भः -

घृताच्यसि............. ध्रुवा नाम्ना.........। (शु.वेदः २/६)

मन्त्रभागोऽयं जुहूनिधाने विनियुक्तः। ध्रुवेति होमसाधनभूतः पात्रविशेषोऽस्ति।

१५६पूर्ववत्, १.३.३६।

१५७ वैखायनश्रौतसूतसूत्रम्, १.८।

[१५८]शतपथब्राह्मणम्, २.३.२.१७।

**शब्दविमर्शः -**

ध्रुवति अप्रचलिता भवतीति ध्रुवा। 'ध्रु-गतिस्थैर्ययोः' इत्यस्माद्धातोरच्-प्रत्यये, टाप्प्रत्यये च कृते सति शब्दोऽयं निष्पन्नो भवति। यज्ञतत्त्वप्रकाशे ध्रुवाया लक्षणमेवं निर्दिष्टमस्ति- हंसमुखसदृशैकप्रणालिकायुता प्रादेशार्धपुष्कराविकङ्कतवृक्षनिर्मिता ध्रुवा भवति।[१५९] यज्ञमधुसूदन्यां तु कर्मपरकं लक्षणं प्राप्यते- सा हि होमाद्यर्थं स्रुवेण गृह्यमाणस्याज्यस्याधारभूता यागसमाप्तिं यावदेकत्र वेद्यां स्थिरा भवति, तस्मात् ध्रुवा।[१६०] यथा मध्यदेहादेव परितो वर्तमानानि हस्तपादादीन्यङ्गानि सर्वाणि उत्पद्यन्ते स्वकार्याय, तथैव यज्ञे ध्रुवा आत्मस्थानीया, तस्या एव सकाशाद् कृत्स्नोऽपि यज्ञः उत्पद्यते। ध्रुवास्थस्याऽऽज्यस्य सर्वयागसाधारण्यं प्रतिपादितं भवति। अत आह शतपथब्राह्मणम्- आत्मैव ध्रुवा। तद्वा आत्मन एवेमानि सर्वाण्यङ्गानि प्रभवन्ति। तस्माद् ध्रुवाया एव सर्वो यज्ञः प्रभवति।[१६१]तैत्तिरीयसंहितायां स्रुचां स्वरूपं निर्दिष्टं यथा- खादिरः स्रुवो भवति, पर्णमयी जुहूर्भवति, आश्वत्थी उपभृत्, वैकङ्कती ध्रुवा भवति, एतद्वै स्रुचां रूपम्।[१६२] दयानन्देनापि ध्रुवन्ति प्राप्नुवन्ति स्थिराणि सुखान्यनया विद्यया सा ध्रुवेति व्युत्पत्तिर्विहिता।[१६३]

## ३.३९ उपभृत्

**शब्दसन्दर्भः -**

घृताच्यसि............ उपभृन्नाम्ना.........। (शु.वेदः २/६)

---

१५९ यज्ञतत्त्वप्रकाशः, पृ.३४।

१६० यज्ञमधुसूदनी, पृ. २५।

१६१शतपथब्राह्मणम्, १.३.२.२।

१६२तैत्तिरीयसंहिता, २.५.७।

१६३यजुर्वेदभाष्यम्, २.६।

मन्त्रभागोऽयं जुहूनिधाने विनियुक्तः। उपभृदिति होमसाधनभूतः पात्रविशेषोऽस्ति।

**शब्दविमर्शः -**

उप-उपसर्गपूर्वकात् भृ-धातोः क्विप्-प्रत्ययेन उपभृत्शब्दो निष्पद्यते । उप समीपे भ्रियतेइति व्युत्पत्त्या होमकालेऽध्वर्युणा सव्यहस्तेन होमार्थं धृता दक्षिणहस्तसम्बन्धिजुह्वाः समीपे धारणात् उपभृत् इति भण्यते । अत उपभृत् इत्यस्यार्थो भवति, जुहूसदृशः यज्ञीयपात्रविशेषः । यज्ञमधुसूदन्यां उपभृत्शब्दस्य व्युत्पत्तिः— चतुर्विंशत्यङ्गुलदण्डाहंसमुखी च जुह्वाः समीपे ध्रियते तस्मादुपभृत् ।[१६४]आचार्यो महीधरस्तु भाष्ये एवमाह— उप समीपे स्थित्वा बिभर्ति आज्यं धारयतीत्युपभृत् ।[१६५] आत्मा वै जुहू ......प्रजा वा उपभृत् ।[१६६]

## ३.४० मित्रावरुणौ

**शब्दसन्दर्भः -**

वसुभ्यस्त्वा............मित्रावरुणौत्वा वृष्ट्यावताम् ............। (शु.वेदः २/१६)

मन्त्रभागोऽयं प्रस्तरग्रहणे विनियुक्तः। अत्र मित्रावरुणौ इति प्राणापानवायू उच्येते।

**शब्दविमर्शः -**

मित्रश्च वरुणश्च मित्रावरुणौ । यजमानो वै प्रस्तर इति श्रुतिः ।[१६७] हे प्रस्तररूप यजमान ! मित्रावरुणौ प्राणापानवायू वृष्ट्या जलवर्षणेन त्वा त्वां अवताम् रक्षताम् । वायुर्वै

---

१६४ यज्ञमधुसूदनी, पृ.२५।

१६५ शुक्लयजुर्वेदसंहिता, २.६। (महीधरभाष्ये)

१६६ मैत्रायणीसंहिता, ४.१.१२।

१६७ शतपथब्राह्मणम् , १.८.१.४४।

वर्षस्येष्टे[१६८] इत्युक्तत्वाद् वर्षाधीशो वायुः । स चाध्यात्मगतः प्राणोदानरूपो मित्रावरुणशब्दाभ्यामुच्यते।

**३.४१ वयः**

**शब्दसन्दर्भः –**

वसुभ्यस्त्वा............व्यन्तुवयोक्तꣳरिहाणा ............। (शु.वेदः २/१६)

मन्त्रभागोऽयं प्रस्तराञ्जने विनियुक्तः। अस्मिन् मन्त्रे वयश्शब्देन गायत्र्यादीनि छन्दांसि उच्यन्ते।

**शब्दविमर्शः –**

'वी गतिव्याप्तिप्रजननकान्त्यसनखादनेषु' इत्यस्माद्धातोर्वयश्शब्दस्य सिद्धिर्भवति। लोके शब्देनानेन पक्षिणो बाल्यादिवर्षस्य वा बोधो भवति – खगबाल्यादिनोर्वयः[१६९]। निरुक्तशास्त्रे शब्दस्यास्य निर्वचनं शाखार्थे विहितमस्ति – वयाः शाखाः[१७०]। तथैव निघण्टौशब्दस्यास्यार्थोऽन्नमायुर्वा विहितोऽस्ति – वय अन्नम् आयुर्वा[१७१]। अत्र तु वयश्शब्देन पक्षिणो बुध्यन्ते। शब्देनानेन पक्षिरूपापन्नानि गायत्र्यादीनि छन्दांसि लक्ष्यन्त इत्यर्थः।

---

[१६८] पूर्ववत्, १.८.३.१२।

[१६९] अमरकोशः २७९६।

[१७०] निरुक्तम् १.२.४।

[१७१] निघण्टुः २.७.७।

## ३.४१ वशापृश्निः

**शब्दसन्दर्भः –**

वसुभ्यस्त्वा...........वशापृश्निर्भूत्वा दिवं गच्छ ...........। (शु.वेदः २/१६)

मन्त्रभागोऽयं प्रस्तरप्रक्षेपणे विनियुक्तः। मन्त्रेऽस्मिन् वशापृश्निशब्देन भूमेर्बोधो भवति। हे प्रस्तर ! वशापृश्निः भूत्वा भूमिसम्बन्धिभागानादाय दिवं गच्छेति।

वशा स्वाधीना पृश्निरल्पतनुर्गौरिति वशापृश्निः कामधेनुवत्तृप्तिकरी । यद्वा इयं वै वशापृश्निर्यदिदमस्यां मूलि चामूलं चान्नाद्यं प्रतिष्ठितं तेनेयं वशापृश्निरिति श्रुतिः।[१७२]

वशापृश्निशब्देन भूमिरुच्यते। अतः पृथिवीसम्बन्धिभागानादाय द्युलोकं तर्पयेत्यर्थः।

**शब्दविमर्शः –**

वश्धातोरच्प्रत्यत्ये टापि च निष्पन्नो वशाशब्दो हस्तिनीं बोधयति – वशा स्त्री करिणी च स्यात्[१७३] इति ।प्रपूर्वादश्नोतेः कर्तरि निप्रत्ययेन, प्राशेः पृश्भावेन च निष्पन्नस्य पृश्निशब्दस्यार्थ अल्पतनुर्विद्यते – पृश्निरल्पतनौ श्रोणः[१७४]इति। निरुक्तशास्त्रे तु पृश्निशब्देनाऽऽदित्योऽवबुध्यते – पृश्निरादित्यो भवति[१७५]। मन्त्रभागेऽस्मिन् वशापृश्निशब्देन भूमेर्बोधो भवति।

---

१७२ शतपथब्राह्मणम्, १.८.३.१५।

१७३अमरकोशः२७६९।

१७४ अमरकोशः ११७०।

१७५निरुक्तम् २.४.१४।

### ३.४३ अनुभरामि

शब्दसन्दर्भः –

यं परिधिं पर्यधत्था..................एतमनु जोषं भरामि.................। (शु.वेदः २/१७)

मन्त्रभागोऽयं परिध्यनुप्रहरणे विनियुक्तः। क्रियापदमिदं प्रक्षेपणार्थं द्योतयति।

शब्दविमर्शः –

सामान्यतः शब्दोऽयमनूपसर्गपूर्वकाद् 'भृञ् भरणे' इत्यस्माद्धातोर्निष्पन्न इत्यनुमीयते, परमित्यत्र तन्न। अनूपसर्गपूर्वकाद् 'हृञ् हरणे' इत्यस्माद्धातोरियं शब्दसिद्धिः। 'हृग्रहोर्भश्छन्दसि' इत्यनेन हकारस्य भकारः। अनुहरामीत्यर्थः। अनुरुपसर्गः भिन्नक्रमः, भरामीत्यनेन सम्बध्यते। परिधिमनुभरामि वह्नौ प्रक्षिपामि इत्यर्थः सिद्ध्यति।

### ३.४४ पाथः

शब्दसन्दर्भः –

यं परिधिं पर्यधत्था.............................पाथोऽपीतम्। (शु.वेदः २/१७)

अयं मन्त्रभागः परिधिप्रक्षेपे विनियुक्तः। अत्र पाथशब्देनान्नमुच्यते।पाथ इत्यन्ननाम।[१७६]

शब्दविमर्शः –

शब्दस्यास्य सिद्धिप्रक्रिया विविधाः दृश्यन्ते। पीयतेऽदः इति व्युत्पत्त्या पाधातोः कर्मणि थप्रत्ययेन निष्पन्नस्य पाथशब्दस्यार्थः कोशकारेण अग्निः सूर्यो वा विहितोऽस्ति ।[१७७] पाधातोरसुन्प्रत्यये थुगागमे च संसिद्धस्य पाथश्शब्दस्यार्थः जलमिति – कबन्धमुदकं पाथः पुष्करं

---

[१७६] निघण्टुः, ९.७।

[१७७] संस्कृत-हिन्दी-कोशः, ६०३।

सर्वतोमुखम् ।[१७८]निरुक्तशास्त्रे पततीति पाथः इति व्युत्पत्त्या गत्यर्थकात् पत्धातोरसुक्प्रत्ययेन, लोकान् पान्तीति पाथः इति व्युत्पत्त्या रक्षणार्थकाद् पाधातोरसुन्प्रत्ययेन च पाथशब्दस्य निर्वचनं विहितमस्ति — पाथोऽन्तरिक्षम् । उदकमपि पाथ उच्यते पानात् । अन्नमपि पाथ उच्यते पानादेवेति ।[१७९] दयानन्दोऽपि शब्दमिममन्नवाचकत्वेनैव स्वीकरोति – पाति शरीरमात्मानं च येन तत्तदन्नम्[१८०] ।

अतो निरुक्ते शब्दस्यास्यार्थत्वेन अन्तरिक्षम्, उदकम्, अन्नञ्चेति निर्दिष्टमस्ति ।अत्र तु पाथशब्दस्य प्राकरणिकोऽर्थोऽन्नमिति विहितः।

### ३.४५ वाट्

**शब्दसन्दर्भः –**

सँस्रवभागाः स्थेषा......................स्वाहावाट्। (शु.वेदः २/१८)

अयं मन्त्रभागः संस्रवहोमे विनियुक्तः। वाट्शब्देन वषट्कार उच्यते। वषट्कारो दानार्थकः।

**शब्दविमर्शः –**

वाडिति वषट्कारः ।स्वाहाकारेण वा वषट्कारेण वा इति श्रुतेर्वषट्कारो दानार्थः । देवानां परोक्षप्रियत्वात् प्रत्यक्षत्वपरिहाराय वाडिति शब्दोऽत्र प्रयुक्तः । दयानन्दस्तु सुखवाहकत्वेन शब्दस्यास्य ग्रहणं विहितम् – वहन्ति सुखानि यया क्रियया सा[१८१] ।

---

[१७८] अमरकोशः, ४७४।

[१७९]निरुक्तम्, ६.२.७।

[१८०]यजुर्वेदभाष्यम्, २.१७।

[१८१]यजुर्वेदभाष्यम्, २.१८।

## ३.४६ धुर्यौ

**शब्दसन्दर्भः –**

घृताचीस्थोधुर्यौ...................। (शु.वेदः २/१९)

अयं मन्त्रभागो जुहूपभृतौ शकटधुरि निधाने विनियुक्तः ।मन्त्रेऽस्मिन् धुर्यौपदेन अनड्वाहौ उच्येते। धुरि भवौ धुर्यौ। यद्वा धुरं वहतस्तौ धुर्यौ अनड्वाहौ इति। जुहूपभृतौ प्रार्थ्येतेऽत्र। हे जुहूपभृतौ ! युवां धुर्यौ अनड्वाहौ पातं रक्षतमित्यर्थः।

**शब्दविमर्शः –**

धुरशब्दस्यार्थो यानमुखम् – धूः स्त्री क्लीबे यानमुखम् इति।[१८२] धुरं यानमुखं वहतीति धुर्यस्तौ धुर्यौ। धुरं यज्ञस्याग्रं मुख्याङ्गं वहतस्तौ धुर्यौ[१८३]। धुर्यौ अनड्वाहौ इत्यर्थः – धूर्वहे धुर्यधौरेयधुरीणाः सधुरन्धराः इति।[१८४]

## ३.४७ दिद्युः

**शब्दसन्दर्भः –**

अग्नेऽदब्धायो................दिद्योः पाहि..........। (शु.वेदः २/२०)

अयं मन्त्रभागः स्रुग्ग्रहणे विनियुक्तः । मन्त्रेऽस्मिन् दिद्युरिति वज्रोऽवबुध्यते । दिद्युरिति वज्रनाम।[१८५]

---

[१८२]अमरकोशः,१५७८।

[१८३]यजुर्वेदभाष्यम्, २.१९।

[१८४] अमरकोशः, १८३६।

**शब्दविमर्शः -**

दिद्युच्छब्दस्त्रिभ्यो धातुभ्यो निष्पद्यते – दिद्युद् द्यतेर्वा द्युतेर्वा द्योततेर्वा इति । द्यति शत्रून् इति व्युत्पत्त्या 'दोऽवखण्डने' धातोः,द्यौति अभिगच्छति प्राणिनः इति व्युत्पत्त्या 'द्यु अभिगमने' धातोः, द्योतते प्रकाशते इति व्युत्पत्त्या 'द्युत दीप्तौ' धातोश्च क्विप्प्रत्ययेन शब्दोऽयं संसिद्ध्यते । ज्वरातिसारादिरोगाख्यम् आयुधमिति दिद्युच्छब्दस्य प्राकरणिकोऽर्थः।[१८६]

## ३.४८ संवेशपतिः

**शब्दसन्दर्भः -**

अग्नेऽदब्धायो................संवेशपतये स्वाहा......... । (शु.वेदः २/२०)

अयं मन्त्रभागः स्रुग्ग्रहणे विनियुक्तः । मन्त्रेऽस्मिन् संवेशपतिशब्देन अग्निरुच्यते ।

स्त्रीपुंसयोरभिलाषपूर्वकमेकत्र शयनं संवेशस्तस्य पतिः संवेशपतिः ।

**शब्दविमर्शः-**

सम्यक् विशन्ति ये ते पृथिव्यादयः पदार्थास्तेषां पतिः पालकः संवेशपतिरिति[१८७] । समुपसर्गपूर्वकं विश्धातोर्घञ्प्रत्यये विहिते सति संवेशशब्दो निष्पद्यते । शब्दोऽयं निद्रावाचकः –

---

[१८५]निघण्टुः, २.२०.१ ।

[१८६]निरुक्तम्, १०.१.७ ।

[१८७]यजुर्वेदभाष्यम्, २.२० ।

स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि ।[१८८]मन्त्रभागेऽस्मिन् स्त्रीपुंसयोरभिलाषपूर्वकमेकत्र शयनं संवेश इत्यर्थो विहितः। संवेशस्य निद्रायाः पतिः संवेशपतिरिति।

### ३.४९ योनिः

**शब्दसन्दर्भः –**

अग्नेऽदब्धायो................सुषदा योनौ स्वाहा.........। (शु.वेदः २/२०)

अयं मन्त्रभागः स्रुग्ग्रहणे विनियुक्तः । अस्मिन् मन्त्रभागे योनिशब्देन गृहमुच्यते । योनिरिति गृहनाम।[१८९]

**शब्दविमर्शः –**

सामान्यतः योनिशब्देन स्त्रीजातेरुत्पत्तिस्थानभूतस्य अङ्गविशेषस्य बोधो भवति । युधातोर्निप्रत्ययेन संसिद्धस्य योनिशब्दस्यार्थः निरुक्तशास्त्रे गर्भाशयस्थानम्, उत्पत्तिस्थानम्, अन्तरिक्षं वा विहितोऽस्ति ।सर्वभूतनिर्माणाश्रयस्य अन्तरिक्षस्य बोधकत्वेन शब्दस्यास्य निर्वचनं विहितमस्ति – योनिरन्तरिक्षं महानवयवः परिवीतो वायुना इति ।[१९०]परमित्यत्र शब्दोऽयं गृहवाचकः – योनिरिति गृहनामसु पठितम्[१९१]। दयानन्देनापि उक्तं यत् स्वकीये ग्रन्थे – युवन्ति यस्यां सा योनिर्गृहं जन्मान्तरं वा[१९२]।

---

[१८८] अमरकोशः, ४३४।

[१८९] निघण्टुः ३.४।

[१९०]निरुक्तम् २.२.८।

[१९१]निघण्टुः, ३.४।

[१९२]यजुर्वेदभाष्यम्, २.२०।

### ३.५० वेदः

**शब्दसन्दर्भः -**

**वेदोऽसि येन त्वं........................ वातेधाः। (शु.वेदः २/२१)**

**अयं मन्त्रभागोवेदमोचने विनियुक्तः । मन्त्रभागेऽस्मिन् वेदशब्देन कुशमुष्टिनिर्मितः पदार्थविशेषोऽवगम्यते।**

**शब्दविमर्शः -**

**वेदशब्दस्य सन्ति बहवोऽर्थाः । 'विद ज्ञाने' इत्यस्माद्धातोर्घञ्-प्रत्ययेन निष्पन्नस्य वेदशब्दस्य स्वरभेदेन अर्थभेदः प्राप्यते । आद्युदात्तो वेदशब्दो ज्ञानवाचकः, अन्तोदात्तश्च कुशमुष्टिवाचकः । कुशमुष्टिवाचकस्य वेदशब्दस्य विषये श्रौतसूत्रे प्राप्यते- वेदं कृत्वा वेदिं करोति। कुशमुष्टिं सव्यावृत्तं वत्सजानुं त्रिवृत्तं मूतकार्यं वा इति ।[१९३] एकपञ्चाशत्कुशपत्राणां मुष्टिर्वेद उच्यते। तत्र कुशमुष्टिं वामपाणौ गृहीत्वा दक्षिणेन पाणिना प्रदक्षिणावृत्तं कृत्वा मध्यभागे मोटनद्वयकरणेन उपविष्टवत्सजानुसदृशं सम्पाद्य बध्नीयादित्येकपक्षः । अथवा तं कुशमुष्टिं वेण्याकारेण बध्नीयादिति द्वितीयपक्षः। अथवा तं कुशमुष्टिं मूताकारवत् कुर्यादिति तृतीयपक्षः। तत्र मीमांसाकोषे सम्मार्जनसाधनेन वेदशब्दस्यार्थः निश्चितः — वेदो नाम दर्भमयं सम्मार्जनसाधनम् इति ।[१९४] दृश्यते च श्रौतपदार्थनिर्वचने— दर्भमुष्टिः प्रदक्षिणमावेष्ट्य द्विगुणः कृतः प्रादेशमात्र उपविष्टवत्सजानुसदृशसम्पन्नः समन्त्रकं वेदिसम्मार्जनादिकर्मोपयोगी प्रचिन्नाग्रो वेद इत्युच्यते ।[१९५] चिन्नस्वामिन एवमाहुः— वेदो नाम शयानवत्सभुग्नजान्वाद्याकृतिविशिष्टो**

---

१९३कात्यायनश्रौतसूत्रम्, पृ.३६।

१९४मीमांसाकोषः, पृ. ३७१५।

१९५श्रौतपदार्थनिर्वचनम्, पृ.१०।

दर्भमुष्टिविशेष इति ।[१९६] दयानन्दस्तु शब्दस्यास्यार्थं जगदीश्वरं विदधाति – वेति चराचरं जगत् स वेदः इति[१९७]।

### ३.५१ गातुवित्

**शब्दसन्दर्भः –**

वेदोऽसि येन त्वं......................देवागातुविदो..............वातेधाः। (शु.वेदः २/२१)

अयं मन्त्रभागः समिष्टयजुर्होमे विनियुक्तः। मन्त्रभागेऽस्मिन् गातुविच्छब्दो यज्ञस्यज्ञातृत्वेन बोधनं करोति।

**शब्दविमर्शः –**

गातुशब्दः 'गै शब्दे' इत्यस्माद्धातोर्तुन्प्रत्ययेन संसिद्ध्यति । कोशकारेणाऽऽप्टेमहाभागेन गातुशब्दस्यार्थो गानं गीतं वा विहितः ।[१९८] निरुक्तशास्त्रे गातुशब्दो गमनार्थे व्याख्यातः ।[१९९] परमित्यत्र गातुशब्देन यज्ञोऽवगम्यते – गातुरिति यज्ञनाम। यद्वा गातुर्गन्तव्यो मार्ग इति। गीयते नानाविधैर्वैदिकशब्दैः प्रतिपाद्यते इति गातुर्यज्ञस्तं वेत्ति जानातीति गातुवित्।

### ३.५२ नभः

**शब्दसन्दर्भः –**

संबर्हिरङ्क्ता....................दिव्यं नभो गच्छतु ........। (शु.वेदः २/२२)

---

१९६मीमांसान्यायप्रकाशः, पृ.४१। (सारविवेचिनी)

१९७यजुर्वेदभाष्यम्, २.२१।

१९८संस्कृत–हिन्दी–कोशः, पृ. ३४१।

१९९निरुक्तम्, ४.४.२२।

अयं मन्त्रभागोबर्हिर्होमे विनियुक्तः। मन्त्रभागेऽस्मिन् नभःशब्देन आदित्यस्य बोधो भवति।

**शब्दविमर्शः –**

नह्यते मेघैरिति व्युत्पत्त्या 'नह बन्धने' इत्यस्माद्धातोरसुन्प्रत्यये भश्चान्तादेशे च नभःशब्दो सिद्ध्यति । लोके नभःशब्द आकाशं श्रावणमासं वा द्योतयति – नभः खं श्रावणो नभाः।[२००] परमित्यत्र शब्देनानेन आदित्योऽवबुध्यते । नभ आदित्यलक्षणं ज्योतिः । नभः इत्यादित्यनामसु पठितमिति ।[२०१] महर्षिणा यास्केनापि स्वकीये ग्रन्थे नीधातोरसुन्प्रत्ययेन संसिद्धस्य नभःशब्दस्य निर्वचनम् आदित्यार्थे विहितमस्ति – नभ आदित्यो भवति, नेता रसानाम्, नेता भासाम्, ज्योतिषां प्रणय इति ।[२०२]

## *।। इति तृतीयोऽध्यायः ।।*

---

[२००] अमरकोषः २८००।

[२०१] निघण्टुः, १.४।

[२०२] निरुक्तम् २.५.१४।

# चतुर्थोऽध्यायः

## पिण्डपितृयज्ञाग्न्याधानचातुर्मास्यादिगतानां पारिभाषिकशब्दानां परिशीलनात्मकः

शुक्लयजुर्वेदीयमाध्यन्दिनशाखाया द्वितीयाध्यायस्यान्ते पिण्डपितृयज्ञगता मन्त्रा विद्यन्ते । तृतीये चाध्याये त्रिषष्टिसंख्याका अग्न्याधानाग्न्युपस्थानचातुर्मास्यादिमन्त्राः सन्ति । शोधप्रबन्धस्याध्यायेऽस्मिन् तेषामेव मन्त्रगतानां कतिपयानां पारिभाषिकशब्दानामर्थविश्लेषणपूर्वकं परिशीलनात्मकमध्ययनं विहितमस्ति । परिशीलनक्रमे उव्वटमहीधरदयानन्दानां भाष्यकाराणां भाष्यत्रयमाधृत्य अध्ययनं विहितम् ।

### ४.१ कव्यवाहनः

**शब्दसन्दर्भः –**

अग्नये कव्यवाहनाय............................वेदिषदः । (शु.वेदः २/२९)

अयं मन्त्रभागोहोमे विनियुक्तः ।अग्नेर्विशेषणमिदं कव्यवाहनपदम् ।कव्यवाहनाय अग्नये स्वाहेति ।

**शब्दविमर्शः –**

कुवन्ति शब्दयन्ति सर्वा विद्या ये ते कवयस्तेभ्यो हितानि कर्माणि कव्यानि, तानि यो वहति प्रापयति सः कव्यवाहन[२०३] इति दयानन्दः । कव्यशब्दःपितॄणां हविर्बोधयति – हव्यकव्ये

[२०३]यजुर्वेदभाष्यम्, २.२९ ।

दैवपित्र्ये अन्ने पात्रं स्रुवादिकम् ।[२०४]कवयः क्रान्तदर्शिनः पितरस्तेषां सम्बन्धि हविरिति कव्यम्, तद्वोढुमधिकारो यस्यास्ति स कव्यवाहनः ।

### ४.२ परापुरः / निपुरः

**शब्दसन्दर्भः -**

ये रूपाणि............. परापुरो निपुरो ये भरन्ति..............वेदिषदः । (शु.वेदः २/३०)

मन्त्रभागोऽयम्उल्मुकपरिक्रमणेविनियुक्तः ।अस्मिन् मन्त्रेएताभ्यां शब्दाभ्यामसुराणां विशेषणत्वमवबुध्यते ।पराक्रान्ताः पुरः परापुरः, निकृष्टाः पुरः निपुरः । परापुरशब्देन स्थूलशरीराणि, निपुरशब्देन च सूक्ष्मशरीराणि ज्ञायन्ते ।[२०५]

### ४.३ आवृषायध्वम्

**शब्दसन्दर्भः -**

अत्र पितरो............. यथाभागमावृषायध्वम्.............आवृषायिषत । (शु.वेदः २/३१)

अयं मन्त्रभागः उदग्वसने विनियुक्तः । मन्त्रभागेऽस्मिन् पितरः प्रार्थ्यन्ते ।

**शब्दविमर्शः -**

आङुपसर्गपूर्वकाद् वृषशब्दात् क्यङ्प्रत्यये लोट्लकारे शब्दस्यास्य सिद्धिर्भवति । पितरः प्रार्थ्यन्तेऽत्र - हे पितरः ! यूयमवृषायध्वम् समन्तात् वृषवदाचरत इत्यर्थः । यथा वृषः स्वाभीष्टं घासं प्राप्य तृप्तिपर्यन्तं स्वीकरोति तद्वद् यूयमपि स्वीकुरुत इत्यर्थः ।

---

[२०४] अमरकोषः १४०१ ।

[२०५]शुक्लयजुर्वेदसंहिता, २.३० ।

### ४.४ पुष्करस्रक्

शब्दसन्दर्भः –

आधत्त पितरो....................पुष्करस्रजम्.................असत्। (शु.वेदः २/३३)

अयं मन्त्रभागः पत्न्या मध्यमपिण्डप्राशनेविनियुक्तः।मन्त्रभागेऽस्मिन् पितरः प्रार्थ्यन्ते।

शब्दविमर्शः –

स्रक्शब्देन मुण्डमालोच्यते, पुष्करशब्देन च पद्मानि। पुष्कराणां पद्मानां स्रक् माला ययोस्तौ पुष्करस्रजौ अश्विनीकुमारौ। पुष्करस्रजौ पद्ममालिनौ देवानां भिषजौ तत्तुल्यः कुमारः पुष्करस्रगिति। तादृशं पुष्करस्रजं अश्विनीकुमारसदृशं रोगहीनं सुन्दरं च कुमारं प्रार्थयत्यत्र।

### ४.५ कीलालम्

शब्दसन्दर्भः –

ऊर्जं वहन्तीरमृतं...................कीलालं परिस्रुतम् .................पितॄन्। (शु.वेदः २/३४)

अयं मन्त्रभागः जलनिषिञ्चनेविनियुक्तः। मन्त्रभागेऽस्मिन् कीलालशब्देन अन्नस्य रसोऽवबुध्यते।

शब्दविमर्शः –

कीले अलं पर्याप्तः समर्थोऽन्नमिष्टं कर्तुं रस इति कीलालः। कीलं बन्धनम्, अलमत्यन्तमन्नस्येति वा कीलालम्। कीलनं कीलो बन्धस्तमलति वारयतीति कीलालमिति वा।

कीलशब्दोऽग्निज्वालावाचकश्च - वह्नेर्द्वयोज्वालकीलौ [२०६] । नपुंसकलिङ्गी कीलालशब्दो जलवाचकः शोणितवाचकश्च - शोणितेऽम्भसि कीलालम् ।[२०७] दयानन्देन तु शब्दोऽयं सुसंस्कृतस्यान्नस्य बोधकत्वेन व्याख्यातः ।[२०८] निघण्टौ चोक्तं यत् - कीलालमित्यन्ननामसु पठितम्[२०९] इति। परं मन्त्रभागेऽस्मिन् नपुंसकलिङ्गी कीलालशब्दोऽयं रसवाची विद्यते।

### ४.६ अंगिरः

**शब्दसन्दर्भः -**

तन्त्वासमिद्भिरङ्गिरो..........। (शु.वेदः ३/३)

मन्त्रभागोऽयं समिदाधाने विनियुक्तः। अङ्गिरशब्देनात्र अग्निः सम्बोध्यते।

**शब्दविमर्शः -**

अङ्गतिर्गत्यर्थः। अङ्गिर्गतिरस्यास्तीति अङ्गिराः। रस्प्रत्ययो मत्वर्थीयः। गमनवानित्यर्थः। अङ्गिरा उ ह्यग्निरिति श्रुतिः ।[२१०] इतरे येऽङ्गारा आसँस्तेऽङ्गिरसोऽभवन्निति, अङ्गिरसामङ्गारपरिणामरूपत्वादङ्गिरः शब्दाभिधेयता । अग्निरप्यङ्गाररूप इति युक्तं तस्याप्यङ्गिरस्त्वमित्यर्थः ।[२११]

---

[२०६]अमरकोषः ११३।

[२०७]अमरकोषः २७३५।

[२०८]यजुर्वेदभाष्यम्, २.३४।

[२०९]निघण्टुः, २.७।

[२१०]शतपथब्राह्मणम्, १.४.१.२५।

[२११]शतपथब्राह्मणम्, १.४.१.२५। (सायणभाष्यम्)

## ४.७ गौः

**शब्दसन्दर्भः –**

आयङ्गौः पृश्निरक्रमीत्.............। (शु.वेदः ३/६)

अयं मन्त्रभाग अग्न्युपस्थाने विनियुक्तः। अत्र गौरित्यस्यार्थोऽग्निरिति प्रतिपादितोऽस्ति।

**शब्दविमर्शः –**

गच्छतीति गौः। गम्धातोर्डोप्रत्ययेन शब्दस्यास्य सिद्धिर्जायते।लौकिके व्यवहारे विशेषतः शब्दोऽयं शृङ्गसास्नादियुक्तं चतुष्पादवन्तं पशुविशेषं बोधयति। गोशब्दस्य सन्त्यनेकेऽर्थाः – स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले।[२१२] परमित्यत्र भाष्यकारेण महीधरेण गौरित्यस्यार्थो याज्ञिकदृष्ट्या अग्नेर्विशेषणत्वेन गमनशीलो विहितोऽस्ति। अग्निःयज्ञनिष्पत्तये यजमानगृहेषु गन्ता भवतीति भावः।

## ४.८ पृश्निः

**शब्दसन्दर्भः –**

आयङ्गौः पृश्निरक्रमीत्.............। (शु.वेदः ३/६)

अयं मन्त्रभाग अग्न्युपस्थाने विनियुक्तः। अत्र पृश्निरित्यस्यार्थोऽग्नेर्विशेषणत्वेन प्रतिपादितोऽस्ति।

**शब्दविमर्शः –**

प्रपूर्वादश्नोतेर्निप्रत्ययेन, प्राशेः पृश्भावेन च निष्पन्नस्य पृश्निशब्दस्यार्थ अल्पतनुर्विद्यते – पृश्निरल्पतनौ श्रोणः इति।[२१३] पृश्निशब्दस्य निर्वचनं विदधन्निरुक्तकारो यास्क

---

[२१२]अमरकोषः २३८४।

[२१३] अमरकोशः ११७०।

शब्देनानेनाऽऽदित्यं गमयति – पृश्निरादित्यो भवति ।[२१४] परमित्यत्र शब्दस्यास्यार्थश्चित्रवर्णः । शब्दकोषकार आप्टेमहाभागोऽपि स्पृश्धातोर्निप्रत्ययपूर्वकं सलोपेनपृश्निशब्दं निर्माय चित्रवर्णात्मकमर्थं विदधाति ।[२१५] पृश्निश्चित्रवर्णः, लोहितशुक्लादिबहुविधज्वालोपेतः । अग्नौ लोहितशुक्लादयो बहुविधा ज्वाला दृश्यन्ते, अतोऽग्निः पृश्निरिति ।

### ४.९ महिषः

**शब्दसन्दर्भः –**

अन्तश्चरति.........महिषोदिवम् । (शु.वेदः ३/७)

अयं मन्त्रभागोऽग्न्युपस्थाने विनियुक्तः । मन्त्रभागेऽस्मिन् महिषशब्देन अग्नेर्बोधो भवति ।

**शब्दविमर्शः –**

लोकेऽस्मिन् महिषशब्देन पशुविशेषोऽवगम्यते – लुलायो महिषो वाहद्विषत्कासरसैरिभाः।[२१६] परमित्यत्र शब्दोऽयमग्नेर्विशेषणत्वेन प्रयुक्तः । महिमाहात्म्यं यागकर्तृस्वरूपं सनोति ददाति स महिषः । अग्निर्वै महिषः स इदं जातो महान् इति श्रुतिः ।[२१७]

---

[२१४]निरुक्तम् २.४.१४ ।

[२१५]संस्कृत-हिन्दी कोषः, पृ. ६३३ ।

[२१६]अमरकोषः ९९६, पृ. १०६ ।

[२१७]शुक्लयजुर्वेदसंहिता, ३.७, पृ. ४३ ।

### ४.१० धाम्

**शब्दसन्दर्भः -**

त्रिॅंशद्धाम................। (शु.वेदः ३/८)

मन्त्रोऽयम् अग्न्युपस्थाने विनियुक्तः। मन्त्रभागेऽस्मिन् धामशब्देनस्थानमवगम्यते।

**शब्दविमर्शः -**

धामशब्दस्य सन्त्यनेकेऽर्थाः- धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोः इति मेदिनी।[२१८] गृहदेहत्विट्प्रभावा धामानि।[२१९]धामानि त्रयाणि भवन्ति स्थानानि नामानि जन्मानीति।[२२०]अत्र धामशब्देन स्थानमुच्यते। अहोरात्रस्य त्रिंशन्मुहूर्ता धामशब्देनाभिप्रेताः। त्रिंशत्सु धामसु मुहूर्ताख्येषु स्थानेषु स्तुतिभिरग्निरयं स्तूयते।

### ४.११ पतंगः

**शब्दसन्दर्भः -**

त्रिॅंशद्धाम........पतङ्गाय धीयते.........। (शु.वेदः ३/८)

अयं मन्त्रभाग अग्न्युपस्थाने विनियुक्तः। मन्त्रेऽस्मिन् पतङ्गशब्देन अग्नेर्बोधो भवति।

---

[२१८]निरुक्तम्, ९.३.२८, पृ. ४२४। (टिप्पण्याम्)

[२१९]अमरकोषः २५८२, पृ. २७१।

[२२०]निरुक्तम्, ९.३.२८, पृ. ४२४।

शब्दविमर्शः –

पतन् गच्छतीति पतङ्गः । पतङ्गशब्देनसामान्यतः पक्षिविशेषस्य ज्ञानं भवति । पतङ्गौ पक्षिसूर्यौ च।[२२१] मन्त्रभागेऽस्मिन्नग्निर्पतङ्गः । पतङ्गः पक्षी, तत्सदृशत्वादग्निः पतङ्गः । कथमग्निर्पतङ्गः ? कश्चित् पक्षी एकस्मात् स्थानात् स्थानान्तरं गच्छति, तद्वदग्निरपि गार्हपत्यस्थानादाहवनीयस्थानं गच्छतीत्यग्नेः पक्षिसादृश्यमिति ।

### ४.१२ सजूः

शब्दसन्दर्भः –

सजूर्देवेन सवित्रा............... । (शु.वेदः ३/१०)

मन्त्रभागोऽयमग्निहोत्रहोमे विनियुक्तः । अस्मिन् मन्त्रेसजूश्शब्देन अग्निरवगम्यते ।

'जुषी प्रीतिसेवनयोः' इत्यस्माद्धातोः जूरित्यस्य सिद्धिर्जायते । जोषणं जूः, समाना जूः प्रीतिर्यस्यासौ सजूः ।यः समानं जुषते सेवते सः ।

### ४.१३ वेतु

शब्दसन्दर्भः –

सजूर्देवेन सवित्रा...............वेतु स्वाहा । (शु.वेदः ३/१०)

मन्त्रभागोऽयमग्निहोत्रहोमे विनियुक्तः । अस्मिन् मन्त्रे वेतु इति क्रियापदं भक्षयतु इत्यर्थं बोधयति ।

'वी प्रजननकान्त्यसनखादनेषु' शब्दोऽयं निष्पद्यते । वेतिरिह पानार्थः स्वादनार्थो वा ।

---

[२२१]अमरकोषः २३७४, पृ. २५० ।

### ४.१४ ककुत्

**शब्दसन्दर्भः –**

अग्निर्मूर्धा.........ककुत्पतिः........। (शु.वेदः ३/१२)

मन्त्रभागोऽयमग्निस्तवने विनियुक्तः । अस्मिन् मन्त्रे ककुच्छब्द आदित्यरूपेणावस्थितमग्निं बोधयति।

**शब्दविमर्शः –**

ककुदिति महन्नामसु पठ्यते ।[२२२]दयानन्दोऽपि ककुदिति महान्तं बोधयति । अहनि आदित्यात्मा द्युलोकस्य मूर्धा भवति, अयमेव ककुत्। अयमेव महानात्मा जगतः कारणमित्यर्थः। ककुच्छब्दो गोपृष्ठोन्नतावयववाचीति महीधरः। अग्निरादित्यरूपेण सर्वोपरिस्थत्वात् ककुत्सदृशः। यद्वा ककुदमिति महन्नाम, महत् जगत्कारणमित्यर्थः।

### ४.१५ जिन्वति

**शब्दसन्दर्भः –**

अग्निर्मूर्धा..........................जिन्वति। (शु.वेदः ३/१२)

मन्त्रभागोऽयमग्निस्तवने विनियुक्तः। अस्मिन् मन्त्रे जिन्वतीति क्रियापदं प्रीणयतीत्यर्थं बोधयति। जिन्वतिः प्रीतिकर्मा। जिन्वति = प्रीणयति, वर्धयति, तर्पयति, परिपुष्यतीति यावत्।

---

[२२२]निघण्टुः, ३.३.१९।

### ४.१६ आहुवध्यै

शब्दसन्दर्भः –

उभावाम्.........आहुवध्या उभा............। (शु.वेदः ३/१३)

मन्त्रभागोऽयमग्न्याधाने विनियुक्तः। अस्मिन् मन्त्रे आहुवध्यै इति क्रियापदम् आवाहनेच्छार्थं बोधयति।

ह्वयतेस्तुमर्थे कध्यैप्रत्ययेन शब्दस्यास्य सिद्धिर्भवति । आहुवध्यै = आह्वयामि, आह्वातुमिच्छामीत्यर्थः।

### ४.१७ मादयध्यै

शब्दसन्दर्भः –

उभावाम्.........मादयध्यै............। (शु.वेदः ३/१३)

मन्त्रभागोऽयमग्न्याधाने विनियुक्तः। अस्मिन् मन्त्रे मादयध्यै इति क्रियापदं हर्षणेच्छार्थं बोधयति।

'मदी हर्षे', 'मद तृप्तौ' वा धातोर्णिजन्तात्तुमर्थे शध्यैप्रत्ययेन शब्दस्यास्य सिद्धिर्जायते। मादयितुं हर्षयितुं वा इच्छामीत्यर्थः।

### ४.१८ हुवे

शब्दसन्दर्भः –

उभावाम्........................हुवे वाम्। (शु.वेदः ३/१३)

मन्त्रभागोऽयमग्न्याधाने विनियुक्तः। अस्मिन् मन्त्रे हुवे इति क्रियापदम् आवाहनार्थं बोधयति।

ह्वयतेः शपि सम्प्रसारणे उवङ्प्रत्यये च शब्दस्यास्य सिद्धिर्जायते। निरुक्तशास्त्रे हुवे इत्यस्यार्थ आह्वयामीति अनेकत्र विहितोऽस्ति।[२२३]

**४.१९ अप्नवान:**

**शब्दसन्दर्भः -**

अयमिहप्रथमो............. यमप्नवानो.................। (शु.वेदः ३/१५)

मन्त्रभागोऽयमग्न्याधाने विनियुक्तः। अस्मिन् मन्त्रे अप्नवान इति पदं पुत्रवन्त इत्यर्थं बोधयति।

**शब्दविमर्शः -**

महर्षिर्यास्क अप्नश्शब्दस्य निर्वचनं विदधाति यत् – अप्न इति रूपनामेति।[२२४]अस्मिन् मन्त्रे तु अप्नशब्दोऽपत्यार्थं गमयति। अप्नशब्दोऽपत्यनामसु पठितः।[२२५] अतोऽप्नवान इत्यस्यार्थः पुत्रवन्त इति सिद्ध्यति। यद्वा अप्नवानृषिः, अप्नवानस्तत्प्रभृतयो मुनय इति च।

**४.२० विशे**

**शब्दसन्दर्भः -**

अयमिहप्रथमो........................विशेविशे। (शु.वेदः ३/१५)

मन्त्रभागोऽयमग्न्याधाने विनियुक्तः। अस्मिन् मन्त्रे विशे इतिपदं मनुष्याय इत्यर्थं बोधयति।

---

[२२३]निरुक्तम् ११.३.३१ / १२.३.२१, पृ. ४८३/५०७।

[२२४]निरुक्तम् ३.२.११, पृ. १२६।

[२२५]निघण्टुः, २.२.७।

**शब्दविमर्शः -**

लोके विश् इति शब्देन सामान्यतः विष्ठायाः वैश्यजातेश्च बोधो भवति - पुरीषं गूथवर्चस्कमस्त्री विष्ठाविशौ स्त्रियौ,[२२६] ऊरव्या ऊरुजा अर्या वैश्या भूमिस्पृशो विशः[२२७] इति । मन्त्रभागेऽस्मिन् प्रयुक्तोऽयं शब्दः मनुष्यजातिं बोधयति । विश् इति मनुष्यनाम ।[२२८] विशश्चतुर्थ्या रूपमिदम्। विशे मनुष्याय इति।

**४.२१ शुक्रम्**

**शब्दसन्दर्भः -**

अस्यप्रत्नाम्...........शुक्रम्...........मृषिम्। (शु.वेदः ३/१६)

मन्त्रभागोऽयं गोस्तवने विनियुक्तः। अस्मिन् मन्त्रे शुक्रमिति शुद्धार्थं गमयति।

**शब्दविमर्शः -**

शुक्रशब्दोऽनेकार्थकः । अग्निः,[२२९] दैत्यगुरुः,[२३०] ज्येष्ठमासः,[२३१] वीर्यम्[२३२] इत्यादयस्तस्यार्थाः । लोकेऽस्मिन् शुक्रशब्देन विशेषतो दैत्यगुरोर्वीर्यस्य वा बोधनं भवति । परमित्यत्र शुक्रमिति शुद्धम्।

---

[२२६]अमरकोषः १२०९, पृ. १२८।

[२२७]पूर्ववत्, १७०८, पृ. १८०।

[२२८]निघण्टुः, २.३.५।

[२२९]अमरकोषः १११, पृ. १७।

[२३०]पूर्ववत्, १९४, पृ. २५।

### ४.२२ अह्रय:

शब्दसन्दर्भ: –

अस्यप्रत्नाम्..........अहूय:...........मृषिम्। (शु.वेद: ३/१६)

मन्त्रभागोऽयं गोस्तवने विनियुक्तः। अस्मिन् मन्त्रे अहूय इति पदं गाव इत्यर्थं बोधयति।

शब्दविमर्श: –

'ह्री लज्जायाम्' इत्यस्माद्धातोः शब्दस्यास्य सिद्धिर्भवति । नास्ति ह्रीर्लज्जा यासां ता अहूयः अलज्जाः उज्ज्वलाः प्रशस्या इत्यर्थः । लज्जारहिताः ।अहूयः गावः । सायं दोहनकालेऽग्निप्रकाशाभावे दुह्यमानं पयो भूमौ पतिष्यतीति शङ्कया दोग्धॄणां लज्जा भवति, सत्यामग्निदीप्तौ स्कन्नशङ्कानुदयाल्लज्जाभावादहूयो दोग्धारश्च।[२३३] दयानन्दस्तु अस्य शब्दस्यार्थं विद्वांस इति विदधाति – अहुवन्ति व्याप्नुवन्ति सर्वा विद्या ये ते विद्वांस[२३४] इति।

### ४.२३ ऋषि:

शब्दसन्दर्भ: –

अस्यप्रत्नाम्...................ऋषिम्। (शु.वेद: ३/१६)

मन्त्रभागोऽयं गोस्तवने विनियुक्तः। अस्मिन् मन्त्रे ऋषिशब्दोगौरित्यर्थं बोधयति।

---

[२३१]पूर्ववत्, २४६, पृ. ३०।

[२३२]पूर्ववत्, ११९७, पृ. १२७।

[२३३]शुक्लयजुर्वेदसंहिता, ३.१६, पृ. ४७।

[२३४]यजुर्वेदभाष्यम्, ३.१६।

शब्दविमर्शः –

'ऋष गतौ' इत्यस्माद्धातोरिन्प्रत्ययेन शब्दोऽयं संसिद्ध्यति । ज्ञानसंसारयोः पारगन्तृत्वेन ऋषिशब्दस्य व्युत्पत्तिर्विहिताऽस्ति – ऋषति प्राप्नोति सर्वान् मन्त्रान् ज्ञानेन, ऋषति पश्यति संसारपारं वेति ऋषिः ।[२३५]अमरकोषकारस्तु सत्यवादिनमृषिर्मन्यते – ऋषया सत्यवचस इति ।[२३६] परमित्यत्र ऋषिशब्देन गौर्बुध्यते – अर्षति दोहनस्थाने गच्छतीति ऋषिर्गौरित्यर्थः ।

## ४.१४ वयस्वन्तः

शब्दसन्दर्भः –

इन्धानास्त्वा.............वयस्वन्तो..............पारमशीय । (शु.वेदः ३/१८)

मन्त्रभागोऽयमग्निप्रार्थने विनियुक्तः । अस्मिन् मन्त्रे वयश्शब्दोऽन्नार्थं द्योतयति ।

शब्दविमर्शः –

'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु' इत्यस्माद्धातोर्वयश्शब्दस्य सिद्धिर्भवति । लोके शब्देनानेन पक्षिणो बाल्यादिवर्षस्य वा बोधो भवति – खगबाल्यादिनोर्वयः[२३७] । निरुक्तशास्त्रे शब्दस्यास्य निर्वचनं शाखार्थे विहितमस्ति – वयाः शाखाः [२३८] । तथैव निघण्टौ शब्दस्यास्यार्थोऽन्नमायुर्वा विहितोऽस्ति – वय अन्नम् आयुर्वा[२३९] । अत्रापि वयश्शब्दोऽन्नार्थं

---

[२३५]शब्दकल्पद्रुमः (इन्टरनेटमाध्यमेन)

[२३६]अमरकोषः १४३८, पृ. १५२ ।

[२३७]पूर्ववत्, २७९६, पृ. २९१ ।

[२३८]निरुक्तम् १.२.४, पृ. १६ ।

[२३९]निघण्टुः २.७.७ ।

द्योतयति । अतो वयस्वन्तोऽन्नवन्त इत्यर्थः । दयानन्दस्तु मन्त्रस्यास्य व्याख्यायां आयुषमर्थं विदधाति – प्रशस्तं पूर्णमायुर्विद्यते येषां ते वयस्वन्तः[२४०] इति।

**४.१५ चित्रावसुः**

**शब्दसन्दर्भः –**

इन्धानास्त्वा.............चित्रावसो.............। (शु.वेदः ३/१८)

मन्त्रभागोऽयमग्निप्रार्थने विनियुक्तः। अस्मिन् मन्त्रे चित्रावसुशब्दो रात्रिं द्योतयति।

**शब्दविमर्शः –**

चित्राणि विविधानि चन्द्रनक्षत्रान्धकाररूपाणि वसन्ति यस्यां रात्रौ सा चित्रावसुः । चित्रावसुशब्देन रात्रिरुच्यते – रात्रिर्वै चित्रावसुः सा हीयँसंगृह्येव चित्राणि वसति इति श्रुतिः।[२४१] दयानन्दस्तु स्वकीये व्याख्याने चित्रावसुशब्दस्यार्थं ईश्वरमिति विदधाति – चित्रमद्भुतं वसु धनं विद्यते यस्मिन् स चित्रावसुः ईश्वरः[२४२] इति।

**४.१६ अन्धः**

**शब्दसन्दर्भः –**

अन्धस्थान्धोवो.........................भक्षीय। (शु.वेदः ३/२०)

---

[२४०]यजुर्वेदभाष्यम्, ३.१८।

[२४१]शतपथब्राह्मणम्, २.३.४.२२।

[२४२]यजुर्वेदभाष्यम्, ३.१८।

मन्त्रभागोऽयं गोप्रार्थने विनियुक्तः। अस्मिन् मन्त्रेऽन्ध इति पदमन्नं बोधयति।

**शब्दविमर्शः -**

सामान्यतोऽन्ध इत्यनेनदृष्टिहीनत्वमवगम्यते - किलासी सिध्मलोऽन्धोऽदृङ् इति।[२४३]अन्नम्, तमःइत्यादयोऽपि शब्दस्यास्यार्थाः - भिःसा स्त्री भक्तमन्धोऽह्म्,[२४४]क्षौद्रेऽप्यन्धं तमस्यपि[२४५]। मन्त्रभागेऽस्मिन् गवां प्रार्थना विहिताऽस्ति । गोर्विशेषणत्वेन प्रयुक्तस्य अन्धश्शब्दस्यार्थ अन्नमिति विहितः। अद्यत इत्यन्धः। अदधातोरसुन्प्रत्ययेन शब्दस्यास्य सिद्धिः। अन्ध इत्यन्ननाम ।[२४६] गावः कथमन्नरूपा इति शङ्कायामुक्तं यत् - क्षीराज्यादिरूपस्यान्नस्य जनकत्वादन्नत्वोपचारः।

## ४.२७ रेवतीः

**शब्दसन्दर्भः -**

रेवतीरमध्वम्.......................मापगात। (शु.वेदः ३/२१)

मन्त्रभागोऽयं गोप्रार्थने विनियुक्तः। अस्मिन् मन्त्रे शब्दोऽयं धनवत्त्वं द्योतयति।

---

[२४३]अमरकोषः, ११९६, पृ. १२६।

[२४४]पूर्ववत्, १८०३, पृ. १९०।

[२४५]पूर्ववत्, २५४०, पृ. २६७।

[२४६]निरुक्तम् ५.१.२, पृ. २१२।

**शब्दविमर्शः -**

सामान्यतः रेवतीशब्दश्रवणात् प्राथम्येन नक्षत्रैकस्य पौराणिकपात्रस्यैकस्य वा प्रतिबिम्बमायाति, परमित्यत्र तन्न। गावः प्रार्थ्यन्तेऽत्र - हे रेवतीः रेवत्यः धनवत्यो गावः ! यूयं रमध्वम् । रयिशब्दान्मतुप्प्रत्यये सम्प्रसारणं पररूपञ्च विहिते सति शब्दस्यास्य सिद्धिर्भवति । रयिर्धनं विद्यते यासां ता रेवत्यः ।रेवत्यः = धनवत्यः । रेवन्तो हि पशवः इति श्रुतिः ।[२४७] रेवन्तः रयिमन्तः, पुत्रपौत्राद्यभिवृद्ध्या धनयुक्ताः पशवो रयिमन्तः । धनहेतुत्वेन धनवत्त्वं गवामिति ।

**४.२८ क्षयः**

**शब्दसन्दर्भः -**

रेवतीरमध्वम्..............क्षये............मापगात। (शु.वेदः ३/२१)

मन्त्रभागोऽयं गोप्रार्थने विनियुक्तः। अस्मिन् मन्त्रे क्षयशब्दो निवासस्थानं द्योतयति।

**शब्दविमर्शः -**

'क्षि क्षये' इत्यस्माद्धातोः क्षयशब्दो निष्पद्यते । शब्दोऽयं नानार्थकः । क्षयशब्दः प्रलयवाची[२४८], रोगवाची[२४९], नाशार्थकश्च[२५०] । परमित्यत्र क्षयशब्दो निवासवाची । क्षियन्ति

---

[२४७] शतपथब्राह्मणम्, २.३.४.२६ ।

[२४८] अमरकोषः २५९, पृ. ३१ ।

[२४९] पूर्ववत्, ११७६, पृ. १२४ ।

[२५०] पूर्ववत्, २२६४, पृ. २३७ ।

निवसन्त्यस्मिन्निति क्षयः ।[२५१] 'क्षय निवासे' इत्यस्माद्धातोरधिकरणे घप्रत्ययेन शब्दस्यास्य सिद्धिर्भवति। अतः शब्देनानेन याज्ञिकदृष्ट्या यजमानगृहमवबुध्यते।

### ४.२९ दोषावस्तः

**शब्दसन्दर्भः -**

सꣳहितासि.............दोषावस्तर्धिया...........एमसि। (शु.वेदः ३/२२)

मन्त्रभागोऽयमग्न्युपस्थाने विनियुक्तः। अस्मिन् मन्त्रे दोषावस्त इत्यनेन अग्नेर्बोधो भवति।

**शब्दविमर्शः -**

दोषां रात्रिं वस्ते स्वतेजसाऽऽच्छाद्य निवारयति सोऽग्निः[२५२]। दोषेति रात्रिनाम[२५३], 'वस निवासे' इत्यस्माद्धातोर्वस्तः ।दोषा रात्रिस्तस्यामपि वसति अजस्रं धार्यमाणत्वान्नोपशाम्यतीति दोषावस्ता । सम्बोधनस्य रूपमिदम् । दोषावस्त इत्यनेन अग्नेर्बोधो भवति । रात्रौ वसनशील इत्यर्थः।

### ४.३० दमः

**शब्दसन्दर्भः -**

राजन्तमध्वराणाम्....................दमे। (शु.वेदः ३/२३)

मन्त्रभागोऽयमग्न्युपस्थाने विनियुक्तः। अस्मिन् मन्त्रे दमशब्देन गृहं बोधयति।

---

[२५१]निरुक्तम्, ८.३.१८, पृ. ४०४ ।(भाष्ये)

[२५२]यजुर्वेदभाष्यम्, ३.२२।

[२५३]निरुक्तम् ३.३.१५, पृ. १३४। / अमरकोषः २८६०, पृ. २९७।

शब्दविमर्शः –

दमशब्दः सामान्यतो दमनार्थं द्योतयति । दमनं बाह्येन्द्रियनिग्रहः । मन्त्रभागेऽस्मिन् शब्देनानेन गृहस्य बोधो भवति। दम इति गृहनाम।[२५४] 'दम उपशमे' इत्यमाद्धातोः शब्दस्यास्य सिद्धिः। दाम्यन्ति उपशाम्यन्ति गृहस्था यत्रेति दमो गृहम्।

## ४.३१ सूपायनः

शब्दसन्दर्भः –

सनः पितेव................सूपायनो भव........... स्वस्तये। (शु.वेदः ३/२४)

मन्त्रभागोऽयमग्न्युपस्थाने विनियुक्तः। अस्मिन् मन्त्रे सूपायन इत्यनेन अग्निः सम्बोध्यते।

शब्दविमर्शः –

सुखेनोपैतुं प्राप्तुं शक्यः सूपायनः । सुष्ठूपप्राप्तुं शक्यः इत्यर्थः । अग्नेर्विशेषणत्वेन प्रयुक्तोऽयं शब्दः। यथा पुत्राय पिता भयं विना सुखेन प्राप्तुं शक्यो भवति तथैव हे अग्ने ! त्वमपि सारल्येन प्राप्तुं शक्यो भव इति प्रार्थ्यते।

## ४.३२ वरूथ्यः

शब्दसन्दर्भः –

अग्नेत्वन्नो................वरूथ्यः...........रयिन्दाः। (शु.वेदः ३/२५)

---

[२५४]निरुक्तम् ४.१.५, पृ. १६५।

अयं मन्त्रभागोऽग्निप्रार्थने विनियुक्तः। मन्त्रेऽस्मिन् वरूथ्यशब्देन अग्निर्बुध्यते।

**शब्दविमर्शः -**

अग्नेर्विशेषणमिदम् । वरुथाय हितो वरुथ्यः । पुत्रादिसमूहो वरुथस्तस्मै हितः । यद्वा वरुथमिति गृहनाम, तस्मै हितो वरूथ्यः । लोके तु वरूथशब्देन रथस्य गुप्तिभागं बोधयति – रथगुप्तिर्वरूथो ना[२५५] इति।

### ४.३३ अथर्यः

**शब्दसन्दर्भः -**

भूर्भुवः स्वः...............पाह्यथर्य...........पाहि। (शु.वेदः ३/३७)

मन्त्रभागोऽयमग्निप्रार्थने विनियुक्तः। अस्मिन् मन्त्रे अथर्यशब्दोऽग्निं सम्बोधयति।

**शब्दविमर्शः -**

अग्नेर्विशेषणमिदम् । 'अत सातत्यगमने' इत्यस्माद्धातोरथरादेशेन शब्दस्यास्य सिद्धिः । सततं गार्हपत्यात्स्वस्थानं दक्षिणाग्निर्गच्छति तेनाथर्यः । अतोऽग्निः अतनवान्, गमनवान् इत्यर्थः । दयानन्दस्तु संशयराहित्यार्थे शब्दमिममर्थापयति – थर्वति संशेते यः सः थर्यो न थर्योऽथर्यः[२५६] ।

---

[२५५]अमरकोषः १५८१, पृ. १६८।

[२५६]यजुर्वेदभाष्यम्, ३.३७।

## ४.३४ पुरीष्यः

**शब्दसन्दर्भः -**

अयमग्निः पुरीष्यो......................आयच्छस्व। (शु.वेदः ३/४०)

मन्त्रभागोऽयमग्न्युपस्थाने विनियुक्तः। अस्मिन् मन्त्रे पुरीष्यशब्दोऽग्नेर्विशेषणत्वेन निरुपितोऽस्ति।

**शब्दविमर्शः -**

अग्नेर्विशेषणमिदम् ।पुरीषस्य हितः पुरीष्यः। पुरीष्यः = पशव्यः। पशवो वै पुरीषम् इति श्रुतिः। 'पॄ पालनपूरणयोः' इत्यस्माद्धातोरीषन्प्रत्ययेन, 'प्रीञ् पूरणे' इत्यस्माद्धातोः कीषन्प्रत्ययेन वा पुरीषशब्दो निर्मीयते- पुरीषं पृणातेः पूरयतेर्वा ।[२५७] अतोऽस्यार्थः पालयिता प्रीणयिता वा जायते। लोके तु पुरीषशब्दो विष्ठार्थकः - पुरीषं गूथवर्चस्कमस्त्री विष्ठाविशौ स्त्रियौ ।[२५८]

## ४.३५ कीलालः

**शब्दसन्दर्भः -**

उपहूता इह गाव.............अन्नस्य कीलालः.............शंयोः। (शु.वेदः ३/४३)

अयं मन्त्रभागोऽग्न्युपस्थाने विनियुक्तः। अस्मिन् मन्त्रे कीलालशब्दो रसवाची विद्यते।

**शब्दविमर्शः -**

कीले अलं पर्याप्तः समर्थोऽन्नमिष्टं कर्तुं रस इति कीलालः । कीलं बन्धनम्, अलमत्यन्तमन्नस्येति वा कीलालम्। कीलशब्दोऽग्निज्वालावाचकश्च - वह्नेर्द्वयोज्वालकीलौ[२५९]

---

[२५७] निरुक्तम् २.७.२२, पृ. ९८।

[२५८] अमरकोषः १२०९, पृ. १२८।

[२५९] अमरकोषः ११३, पृ. १७।

। दयानन्देन तु शब्दोऽयं सुसंस्कृतस्यान्नस्य बोधकत्वेन व्याख्यातः ।[२६०] निघण्टौ चोक्तं यत् – कीलालमित्यन्ननामसु पठितम् [२६१] इति । नपुंसकलिङ्गी कीलालशब्दो जलवाचकः शोणितवाचकश्च – शोणितेऽम्भसि कीलालम् ।[२६२]मन्त्रस्यास्य कीलालशब्दस्तु पुँल्लिङ्गी । शब्दोऽयं रसवाची विद्यते – कीलालशब्दो रसवचनः ।[२६३]

### ४.३६ करम्भः

**शब्दसन्दर्भः –**

प्रघासिनो................करम्भेण सजोषसः। (शु.वेदः ३/४४)

अयं मन्त्रभागो मरुदावाहने विनियुक्तः। मन्त्रेऽस्मिन् करम्भशब्दो हविर्विशेषाख्यं विद्यते।

**शब्दविमर्शः –**

यवमयो हविर्विशेषः करम्भः । कपूर्वकरम्भधातोर्घञ्प्रत्ययेन निर्मितः करम्भशब्दः दधिसिक्तं यवपिष्टमयं हविर्बोधयति। केन जलेन रभ्यते सिच्यते मिश्रीक्रियत इति करम्भः। करम्भोदध्ना संयुक्ताः सक्तवः। तथा च अमरकोशे— करम्भो दधिसक्तवः [२६४]। केचित्तु—

---

[२६०]यजुर्वेदभाष्यम्, २.३४।

[२६१]निघण्टुः, २.७।

[२६२]अमरकोषः २७३५, पृ. २८६।

[२६३]शुक्लयजुर्वेदसंहिता, ३.४३, पृ. ५८।

[२६४]अमरकोषः १८०२, पृ.

शमीपत्रमिश्राणि करीराणि करम्भः[२६५]। दध्ना सम्मिश्रणेन यवपिष्टेन निर्मितं हविः करम्भपदवाच्यमिति।

### ४.३७ अवयजामहे

शब्दसन्दर्भः -

यद्ग्रामे यदरण्ये................तदवयजामहे स्वाहा। (शु.वेदः ३/४५)

अयं मन्त्रभागो करम्भपात्रहोमे विनियुक्तः। अस्मिन् मन्त्रे अवयजामहे इति क्रियापदं नाशनार्थं बोधयति।

शब्दविमर्शः -

अवोपसर्गपूर्वकाद् यजनार्थकाद् यज्धातोः शब्दस्यास्य सिद्धिर्जायते। 'यजामहे' इत्यस्यार्थो यज्ञं कूर्म इति भवति परमुपसर्गेण धात्वर्थो बलादन्यत्र नीयते। अतः 'अवयजामहे' इत्यस्याप्यर्थो नाशयाम इति। अवयजनं नाम तस्मात् सर्वस्मात् प्रमोचनं विश्लेषः।[२६६] अवपूर्वो यजिर्नाशिनार्थ इति।

### ४.३८ अस्तम्

शब्दसन्दर्भः -

अक्रन्कर्मकर्म.................कृत्वास्तं प्रेत सचाभुवः। (शु.वेदः ३/४७)

---

[२६५]आपस्तम्बश्रौतसूत्रम्, ८.५.३७।

[२६६]शतपथब्राह्मणम् २.५.२.२५, पृ. ३०८।

मन्त्रभागोऽयं वाचने विनियुक्तः। अस्मिन् मन्त्रे अस्तमिति पदं गृहं बोधयति।

**शब्दविमर्शः -**

अस्तमिति अदर्शनम् ।[२६७] शब्देनानेन अस्ताचलपर्वतोऽपि ज्ञायते ।[२६८] परन्तु मन्त्रभागेऽस्मिन् अस्तमिति गृहबोधकं विद्यते । अस्तमिति गृहनाम ।[२६९] अस्धातोरधिकरणेऽर्थे क्तप्रत्ययेन शब्दस्यास्य सिद्धिः। अस्यते क्षिप्यते सर्वं वस्तुजातमस्मिन्निति अस्तम्। उक्तमपि यत्- गृहा वा अस्तम्[२७०] इति।

### ४.३९ अवभृथः

**शब्दसन्दर्भः -**

अवभृथनिचुम्पुण................रिषस्पाहि। (शु.वेदः ३/४८)

अयं मन्त्रभागोऽवभृथस्नाने विनियुक्तः। अस्मिन् मन्त्रे अवभृथशब्दो यज्ञविशेषः।

**शब्दविमर्शः -**

अवभृथो यज्ञविशेषः । अवाचीनानि पात्राणि जलमध्ये भ्रियन्ते यस्मिन् यज्ञविशेषे सोऽयमवभृथः। अवोपसर्गपूर्वकाद् 'भृञ् भरणे' इत्यस्माद्धातोर्थक्प्रत्ययेन शब्दस्यास्य सिद्धिः। वरुणप्रघासाख्यस्य कर्मणोऽन्ते तदङ्गभूतं अवभृथाख्यं कर्म जलसमीपे विधीयते। सोऽवभृथः

---

[२६७]अमरकोषः २८८३, पृ. ३००।

[२६८]पूर्ववत्, ६३७, पृ. ७४।

[२६९]निघण्टुः, ३.४.५।

[२७०]शतपथब्राह्मणम् २.५.२.२९, पृ. ३११।

स्नानरूपः । अवभृथाख्यं कर्म यज्ञस्य प्रधानकर्मसमाप्तौ दीक्षान्तरूपेण सम्पाद्यते । दीक्षान्तापरपर्यायोऽयं शब्दः – दीक्षान्तोऽवभृथो यज्ञे[२७१] । तत्र यजमानदम्पतीभ्यां जले स्नानं क्रियते।

### ४.४० निचुम्पुणः

शब्दसन्दर्भः –

अवभृथनिचुम्पुण................रिषस्पाहि। (शु.वेदः ३/४८)

अयं मन्त्रभागोऽवभृथस्नाने विनियुक्तः । मन्त्रेऽस्मिन् निचुम्पुणशब्दोऽवभृथाख्यस्य यज्ञस्य विशेषणत्वेन निरूपितो विद्यते।

शब्दविमर्शः –

'चुप मन्दायां गतौ' इत्यस्माद्धातोरुणन्प्रत्यये धातोर्मुमागमञ्च विहिते सति चुम्पुणशब्दो निष्पद्यते ।नितरां चोपति मन्दं गच्छतीति निचुम्पुणः ।शब्दोऽयमनेकार्थकः – निचुम्पुणः सोमो निचान्तपृणो निचमनेन प्रीणाति । समुद्रोऽपि निचुम्पुणः, निचमनेन पूर्यते । अवभृथोऽपि निचुम्पुण उच्यते, नीचैरस्मिन्क्वणन्ति, नीचैर्दधतीति वा । निचुम्पुण निचुङ्कुणेति च।[२७२]नीचैरस्मिन् क्वणन्ति नीचशब्देन कर्म कुर्वन्तीति निचुम्पुणः । अथवा नीचैरस्मिन् यज्ञपात्राणि दधतीति निचुम्पुणः। तानि हि यज्ञपात्राणि अवभृथाख्ये यज्ञेऽप्सु निधीयन्ते।

---

[२७१]अमरकोषः १४०७, पृ. १४९।

[२७२]निरुक्तम् ५.३.१७, पृ. २४८-२४९।

### ४.४१ पुरूरावा

शब्दसन्दर्भः -

अवभृथनिचुम्पुण....................पुरुराव्णो देवरिषस्पाहि। (शु.वेदः ३/४८)

अयं मन्त्रभागो अवभृथस्नाने विनियुक्तः। अस्मिन् मन्त्रे शब्दोऽयं विरुद्धफलदातृत्वेन निरुपितो विद्यते।

शब्दविमर्शः -

अवभृथेष्टिः प्रार्थ्यतेऽत्र । हे अवभृथ ! पुरुराव्णो वरुणपाशग्रहलक्षणात् पापादस्मान् पाहीति। पुरुशब्दोपपदपूर्वकात् 'रा दाने' इत्यस्माद्धातोः क्वनिप्प्रत्यये शब्दस्यास्य सिद्धिर्भवति। पुरु बहुलं विरुद्धं फलं राति ददातीति पुरुरावा । भाष्यकारेण महीधरेण शब्दस्यास्यार्थो विरुद्धफलदायीति विहितः।

### ४.४२ नाराशंसः

शब्दसन्दर्भः -

मनोनु.....................नाराशंसेन स्तोमेन। (शु.वेदः ३/५३)

अयं मन्त्रभागो गार्हपत्योपस्थाने विनियुक्तः । मन्त्रेऽस्मिन्नाराशंसशब्दः स्तोत्रस्य विशेषणत्वेन निरुपितो विद्यते।

शब्दविमर्शः -

शंसः प्रशंसनम्। नराणां मनुष्याणां योग्यः शंसो नराशंसस्तत्सम्बन्धी नाराशंसः ।यद्वा नरां प्रशस्यन्ते दीर्घायुषः पुत्रवन्तो धनवन्तो भूयासुरित्यादिभिर्गुणैः स नाराशंसः। नराशंसो नाम यज्ञः।

अस्मिन् यज्ञे नरा मनुष्या आसीनाः उपविष्टाः सन्तः शंसन्ति स्तुवन्तीति नराशंसस्तत्सम्बन्धी नाराशंसः – नराशंसो यज्ञ इति । नरा अस्मिन्नासीनाः शंसन्ति ।[२७३] अग्निरपि नराशंस उच्यते – अग्निरिति शाकपूणिः । नरैः प्रशस्यो भवतीति ।[२७४]

### ४.४३ अवसम्

**शब्दसन्दर्भः –**

एतत्तेरुद्राऽवसम्........................। (शु.वेदः ३/६१)

मन्त्रभागोऽयं रुद्रप्रार्थने विनियुक्तः । अस्मिन् मन्त्रेऽवसशब्दो भोज्यपदार्थं बोधयति ।

**शब्दविमर्शः –**

महर्षिणा यास्केनावसशब्दस्य निर्वचनं विहितमस्ति– अवसं गावः पथ्यदनमिति।[२७५] गत्यर्थस्य अवतेः शब्दस्यास्य सिद्धिः । अवदगच्छदश्नातीत्यवसम् । मन्त्रभागेऽस्मिन् शब्दस्यास्य पथ्यदनार्थो गृहीतः । अवसमिति हविःशेषाख्यं भोज्यम् । अवसं पथ्यदनं शम्बलम् । अवसशब्देन देशान्तरं गच्छतो मार्गमध्ये तटाकादिसमीपे भोक्तव्य ओदनविशेष उच्यत इति ।

---

[२७३]निरुक्तम् ८.२.६, पृ. ३९६ ।

[२७४]पूर्ववत्, ८.२.६, पृ. ३९६ ।

[२७५] पूर्ववत्, १.६.१७, पृ. ४४ ।

### ४.४४ त्र्यायुषम्

शब्दसन्दर्भः –

त्र्यायुषं जमदग्नेः.......................त्र्यायुषम्। (शु.वेदः ३/६२)

अयं मन्त्रभागो जपेविनियुक्तः। अस्मिन् मन्त्रे त्र्यायुषशब्दो कालत्रयाणामायुषं बोधयति।

त्रयाणामायुषां समाहारस्त्र्यायुषम्। बाल्ययौवनस्थविरकालत्रयाणामायुषां समाहार इत्यर्थः।

## *।। इति चतुर्थोऽध्यायः ।।*

# पञ्चमोऽध्यायः

## उपसंहारः

शुक्लयजुर्वेदे पारिभाषिकशब्दाः इति शीर्षकयुतोऽयं शोधप्रबन्धस्त्रिभुवन-विश्वविद्यालयान्तर्गतस्य संस्कृत-केन्द्रीय-विभागस्य स्नातकोत्तर(एम.ए.)-तहगततृतीयसामिसत्रस्य द्वादशपत्रस्य पाठ्यांशपूर्तये विनिर्मितोऽस्ति।

पौरस्त्यवाङ्मये वेदानामस्ति महद्गौरवं स्थानम् । वेदानुकूलधर्माचरणमास्तिकत्वं तद्विपरीतं नास्तिक्यमिति मन्यते। वेदस्य द्वौ सम्प्रदायौ मनीषिभिः स्वीकृतौ स्तः— ब्रह्मसम्प्रदायः आदित्यसम्प्रदायश्चेति । प्राच्यनयेन पौराणिकाध्ययनेन सर्वविदितमिदं यत् सृष्ट्यारम्भे ब्रह्मा वेदचतुष्टयं प्रवर्तितवानिति। सोऽयं वेदो ब्रह्मणा प्रमुखेभ्यः स्वशिष्येभ्यः समुपदिष्टः। अयमेव वेदो ब्रह्मसम्प्रदायगतः। एतदतिरिक्तं योगिना याज्ञवल्क्येन भगवतः सूर्यस्य समाराधनेनाधिगतः यः शुक्लयजुर्वेदः पञ्चदशशाखात्मकः स आदित्यसम्प्रदायगत इति संज्ञाप्यते।

शब्दार्थदृष्ट्या शब्दो द्विविधः - सामान्यशब्दः पारिभाषिकशब्दश्च । कस्मिँश्चिद् क्षेत्रविशेषे यो शब्दो निश्चितार्थं द्योतयति स पारिभाषिकः। यश्च निश्चितार्थे नैव प्रयुज्यते स सामान्यः। पारिभाषिकशब्दः सीमाबद्धो भवति, स विशिष्टमर्थं सङ्केतयति, सामान्यव्यवहारे नैव तस्य प्रयोगः। पारिभाषिकशब्दानां प्रकरणानुकूलार्थज्ञानाभावे वेदग्रन्थग्रन्थिर्नैवोद्घाट्यते । अतः पारिभाषिकशब्दानां परिशीलनं नितरामावश्यकं भवति। अतः शुक्लयजुर्वेदीयमाध्यन्दिनशाखायाः प्रथमाध्यायादारभ्य तृतीयाध्यायपर्यन्तं संहितागतानां कतिपयानां पारिभाषिकशब्दानामर्थविश्लेषणपूर्वकं परिशीलनात्मकमध्ययनं विधाय मयाऽत्र लघ्वायासो विहितः। परिशीलनक्रमे उव्वटमहीधरदयानन्दानां भाष्यकाराणां भाष्यत्रयमाधारत्वेन स्वीकृतम्।

यजुर्वेदस्य प्रतिपाद्यो विषय एव मुख्यत्वेन यज्ञप्रतिपादनमिति । यज्ञः देवतोद्देशेन द्रव्यत्यागद्वारा सम्पाद्यते। अस्याः सृष्टेः सञ्चालिकाया ईश्वरशक्तेर्नाम देवता अस्ति। इमाः नैकाः शक्तयः विविधदेवनामभिः सम्बोध्यन्ते । निखिलस्यापि संसारस्य विविधसमस्याभिः सह मानवस्य वैयक्तिकस्य जीवनस्य सुखसमृद्ध्युन्नत्यवनतिलाभहानिरोगशोकानामस्ति गहनः सम्बन्धः। आसां देवशक्तीनामनुकूलतां प्राप्यैव मनुष्यो अतीव सारल्येन स्वोन्नतिं कर्तुं शक्नोति। देवशक्तीनामनुकूलतायै यावन्त्यपि साधनानि यज्ञक्रियादिक्षेत्रेषु प्राप्यन्ते। एषु यज्ञ एव सर्वश्रेष्ठो विद्यते, उक्तमपि यत् – यज्ञो वै श्रेष्ठतमं कर्म इति ।

शुक्लयजुर्वेदीयमाध्यन्दिनसंहितायां चत्वारिंशदध्याया विद्यन्ते । तत्रान्तिमोऽध्याय उपनिषद्भागः, तदन्येष्वध्यायेषु श्रौतयागानां निरुपणं प्राप्यते । संहितायामस्यां दर्शपौर्णमासेष्टिमारभ्य अग्निष्टोम-अश्वमेध-पुरुषमेध-चातुर्मास्य-वाजपेय-राजसूयप्रभृतीनां विविधानां यज्ञानां प्रतिपादनं विद्यते। यज्ञप्रतिपादकानां तेषां शुक्लयजुर्वेदीयमन्त्राणां भाष्यमपि भाष्यकारैर्याज्ञिकदृष्ट्यैव विहितं दृश्यते।

शुक्लयजुर्वेदीयमाध्यन्दिनशाखाया भाष्यकारत्वेन उव्वटमहीधरौ प्रशस्यौ स्तः । अनयोर्भाष्ययोराधिक्येन साम्यमनुभूतं मया । ताभ्यां भाष्यकाराभ्यां वैदिकशब्दानामर्थो याज्ञिकदृष्ट्या विहितोऽस्ति। आर्यसमाजस्य प्रवर्तको महर्षिर्दयानन्द-सरस्वती च वेदभाष्यकार्ये कृतयोगदानो विद्यते। अस्य भाष्ये तु परम्परात आगतो रुढ्यर्थो नैव स्वीकृतो दृश्यते। एष आधुनिकविज्ञानसापेक्षमर्थं स्वीकरोतीति मन्मतम्।

शोधप्रबन्धेऽस्मिन् शब्दसन्दर्भशीर्षके वैदिकशब्दानां प्रयोगस्थलं निर्दिश्य शब्दविमर्शाख्ये शीर्षकेऽमरकोश-शब्दकोशादिगतेनार्थेन सह निरुक्त-ब्राह्मणादिवैदिकग्रन्थगतार्थस्य तुलना विहिताऽस्ति । केषुचन स्थानेषु याज्ञिकप्रसङ्गश्च सन्निविष्टो विद्यते। एवं क्रमेण विहितेन परिशीलनकर्मणा वैदिकशब्दज्ञाने श्रौतयागप्रबोधने च सारल्यं जायते। अत एव मया एष प्रयत्नो

विहितः । एतादृशे महत्त्वाधायके कर्मणि वैदिकविदुषां रुचिर्प्रसारिता भवेत् । तेन च वैदिकज्ञानपिपासवः श्रौतयागजिज्ञासवश्च उपकृता भवन्ति ।

## *॥ इति पञ्चमोऽध्यायः ॥*

# <u>सन्दर्भग्रन्थसूची</u>


१. आप्टे, वामनः शिवरामः, **संस्कृत-हिन्दी-कोशः**, वाराणसी, चौखम्बा विद्याभवनम्, सन् २००७।

२. **ईशादिदशोपनिषदः**, (शाङ्करभाष्यसमेताः), मोतीलाल-वनारसीदासः, सन् १९६४।

३. (सम्पा.) उपाध्यायः, बलदेवः, **वेदभाष्यभूमिकासंग्रहः**, वाराणसी चौखम्बा संस्कृत सीरीज अफिस, सन् १९५८।

४. कात्यायनः, **कात्यायनश्रौतसूत्रम्** (कर्कभाष्यसहितम्), नवदेहली, श्रीलालबहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विद्यापीठम्, सन् २००९।

५. गौडः, वेणीराम शर्मा, **यज्ञमीमांसा**, वाराणसी, वैदिक-पुस्तकालयः, सन् १९७०।

६. चौबे, बी. बी., **शतपथब्राह्मणम्**, दिल्ली, भारतीय-विद्याप्रकाशनम्, सन् १९८९।

७. (सम्पा.) जोशी, जयशंकर, **हलायुधकोशः**, उत्तरप्रदेशः, प्रकाशन ब्यूरो, सूचना-विभागः, सन् १८७९।

८. (सम्पा.) झा, म.म.पं. श्रीमुकुन्दः, **निरुक्तम्** (यास्कमुनिप्रणीतम्), चौखम्बा-संस्कृत-प्रतिष्ठानम्, सन् २००२।

९. दीक्षितः, भट्टोजिः, **सिद्धान्तकौमुदी**, वाराणसी, मोतीलाल-बनारसीदासः, सन् १९५१।

१०. द्विवेदी, मनोहरलालः, **कात्यायनयज्ञपद्धतिविमर्शः**, नवदेहली, राष्ट्रिय-संस्कृत-संस्थानम्, सन् १९८८।

११. पन्तः पर्वतीयः, नित्यानन्दः, **कातीयेष्टिदीपकः**, वाराणसी, चौखम्बा-संस्कृत-संस्थानम्, वि.सं. २०३२।

१२. (व्याख्या.) पाठकः, श्रीजगन्नाथः, **ऋग्वेदभाष्यभूमिका** (श्रीसायणाचार्यविरचिता), वाराणसी, चौखम्बा-विद्याभवनम्, सन् १९९१।

१३. पाणिनिः, **अष्टाध्यायी**, वाराणसी, चौखम्बा-सुरभारती-प्रकाशनम्, सन् १९८७।

१४. भट्टाचार्यः, तारानाथः, **वाचस्पत्यम्**, (षड्भागात्मकम्), वाराणसी, विद्याविलासप्रेस,सन् १९६२।

१५. **मनुस्मृतिः**, (कुल्लूकभट्टकृतमन्वर्थमुक्तावलीयुक्ता), बम्बई, निर्णयसागरमुद्रालयः, सन् १९४६ ।

१६. महर्षिः आपस्तम्बः, **आपस्तम्बश्रौतसूत्रम्,** (धूर्तस्वामिभाष्यसहितम्), गायकवाड ओरियन्टल सीरिज, सन् १९५५ ।

१७. (सम्पा.) मालवीयः, सुधाकरः, **ऐतरेयब्राह्मणम्** (सायणभाष्यसहितम्), वाराणसी, तारा प्रिन्टिङ्ग वर्क्स, वि.सं. २०४० ।

१८. मिश्रः, जगदीशचन्द्रः, **वैदिकवाङ्मयस्येतिहासः**, वाराणसी, चौखम्बा–सुरभारती–प्रकाशनम्, सन् २०१२ ।

१९. (सम्पा.) मिश्रः, युगलकिशोरः, **शतपथब्राह्मणम्** (हिन्दीव्यख्यासहितम्), वाराणसी, सम्पूर्णानन्द–संस्कृत–विश्वविद्यालयः, वि.सं. २०६१ ।

२०. मिश्रः, श्रीकिशोरः, **वेदशाखापर्यालोचनम्,** वाराणसी, चौखम्बा–विद्याभवनम्, सन् २००१ ।

२१. (सम्पा.) मिश्रः, श्रीकिशोरः, **स्मार्तोल्लासः**, वाराणसी, सम्पूर्णानन्द–संस्कृत–विश्वविद्यालयः, सन् १९९९ ।

२२. मिश्रः, श्रीरामचन्द्रः, **संस्कृतसाहित्येतिहासः**, वाराणसी, चौखम्बा–विद्याभवनम्, सन् १९९३ ।

२३. (सम्पा.) मीमांसकः, युधिष्ठिरः, **श्रौतपदार्थनिर्वचनम्,** हरियाणा, बहालगड, वि.सं. २०४१ ।

२४. राधाकान्तदेवः, **शब्दकल्पद्रुमः**, (पञ्चभागात्मकः), वाराणसी, चौखम्बा संस्कृत सीरीज अफिस, सन् १९६१ ।

२५. (सम्पा.) राय, चन्द्रकान्ता, **कात्यायनशुल्वसूत्रम्** (वृत्तिपञ्चकसमन्वितम्), वाराणसी, वैदिक–उन्नयन–संस्थानम्, वि.सं. २०६७ ।

२६. शर्मा, विद्याधरः, **कात्यायनश्रौतसूत्रम्** (श्रीमन्महर्षिकात्यायनप्रणीतम्, सरलावृत्तिसहितम्), दिल्ली, चौखम्बा–संस्कृत–प्रतिष्ठानम्, सन् २००५ ।

२७. (सम्पा.) शर्मा, श्रीधरः, **शतपथब्राह्मणम्** (सायणभाष्यसहितम्), दिल्ली, नागप्रकाशनम्, सन् १९९० ।

२८. (सम्पा.) शास्त्री, गोपालः, **अष्टाध्यायी**, वाराणसी,चौखम्बा–सुरभारती–प्रकाशनम्,सन् १९७६ ।

२९. शास्त्री, चिन्नस्वामी, **यज्ञतत्त्वप्रकाश**ः, मद्रास, बर्नल प्रेष, सन् १९५३ ।

३०. (व्याख्या.) शास्त्री, दयाशङ्करः, **अर्थसंग्रह**ः (लौगाक्षिभास्करकृतः), वाराणसी, चौखम्बा–विद्याभवनम्, सन् २००८ ।

३१. (सम्पा.) शास्त्री, पट्टाभिरामः, **जैमिनीयन्यायमाला** (सायणमाधवाचार्यप्रणीता), वाराणसी, चौखम्भा–प्रकाशनम्, वि.सं. २०६६ ।

३२. (सम्पा.) शास्त्री, महादेवः, **तैत्तिरीयसंहिता**, मैसूर, सन् १८८४ ।

३३. (व्याख्या.) शास्त्री, राजवीरः, **वैदिककोष**ः (विमर्शटीकया सहितः) नवदेहली, श्रीमद्दयानन्द–वेदार्ष–महाविद्यालय–न्यासः, वि.सं. २०६६ ।

३४. (व्याख्या.) शास्त्री, रामकृष्णः, **शुक्लयजुर्वेदसंहिता** (तत्त्वविवेचिनीहिन्दीव्याख्योपेता) वाराणसी, चौखम्बा–विद्याभवनम्, सन् २००७ ।

३५. **श्वेताश्वतरोपनिषद्**, (शाङ्करभाष्यसहिता), गोरखपुरम्, गीताप्रेस, वि.सं. २०२३ ।

३६. (सम्पा.) सरस्वती, केवलानन्दः, **मीमांसाकोष**ः, प्रज्ञापाठशाला मण्डल ग्रन्थमाला, सन् १९६६ ।

३७. सरस्वती, दयानन्दः, **ऋग्वेदादिभाष्यभूमिका**, नवदेहली, विजयकुमार–गोविन्दराम–हासानन्दः, सन् २०११ ।

३८. सरस्वती, दयानन्दः, **यजुर्वेदभाष्यम्**, हरिद्वारम्, श्रद्धानन्द–अनुसन्धान–प्रकाशन–केन्द्रम्, सन् २००८ ।

३९.सिंहः, अमरः, **अमरकोष**ः, (बालकृष्णाश्रमीनेपालीटीकया सहितः), वाराणसी, यशोदा–पुस्तकालयः, ...... ।

*।। इति ।।*